

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगुरुगणेशराधामुकुंदराजायेनमः॥श्रीराधाकृष्णायनमः॥ॐ परमात्मनेनमः॥ दृष्टांतोनैवदृष्टस्त्रिभुवनजठरेसद्गुरो
र्ज्ञानदातुः स्पर्शश्चेत्तत्रकल्प्यः सनयतियदहोस्वर्णतामश्मसारं॥नस्पर्शत्वंतथापिश्रितचरणयुगेश्रीगुरुः स्वीयशिष्ये
स्वीयंसाम्यंविधत्ते भवतिनिरुपमस्तेनवालौकिकोपि॥१॥टीका॥ज्ञानदातुः श्रीगुरोः त्रिभुवनजठरेदृष्टांतोनैवदृष्टः
क्षुद्रविद्योपदेष्टॄणांगुरूणांदृष्टांतः कथंचिदुपलभ्यते॥परंतुनहिज्ञानेनसदृशंपवित्रमिहविद्यते॥इत्युक्तत्वात्।ज्ञान
दातुर्दृष्टांतस्त्रिभुवनजठरांतर्वर्तिषुदेवादिलौकिकेषुनानाविचित्रवस्तुषुनैवदृष्टः। अथमनाक्साम्यदर्शनेनस्पर्श
पाषाणोदृष्टांतत्वेनकल्प्यः कल्पनीयश्चेत्तथापिनघटतइत्याह। सनयतीति। संस्पर्शाश्माऽश्मसारंलोहं यद्यपिस्व
र्णतांनयतिप्रापयति। तथापिस्पर्शत्वंनप्रापयतिस्वसदृशंनकरोति। सद्गुरुः श्रितचरणयुगेस्वीयशिष्येस्वीयंसाम्यंवि
धत्ते। तेनकारणेनस्पर्शादेर्दृष्टांतानर्हत्वात् गुरुर्निरुपमोदृष्टांतशून्यः। तथालौकिकोपिप्रपंचातीतोपिनदृष्टः।आत्मा
॥श्लोक॥ कारत्वात्। ज्ञानीत्वात्मैवमेमतमितिभगवद्वाक्यात्॥१॥ यद्वच्छ्रीखंडवृक्षप्रसृतपरिमलेनाभितोऽन्येपिवृक्षाः शश्व
त्सौगंध्यभाजोप्यतनुतनुभृतांतापमुन्मूलयंति॥आचार्यालब्धबोधाअपिविधिवशतः सन्निधौसंस्थितानांत्रेधातापंचपापं
सकरुणहृदयाः स्वोक्तिभिः क्षालयंति॥टीका॥अथश्रीगुरोः सन्निधानमात्रेणैवशिष्यः कृतार्थतामेतिकिंपुनरुपदेशादि
त्याह। श्रीखंडवृक्षोमुख्यश्चंदनवृक्षस्तस्मात्प्रसृतोयः परिमलः तेनाभितः समंतः अन्येपिवृक्षाअपिशश्वन्निरंतरंसौगंध्य त

Acc. NO. ~~2793~~. M-1851
Title - शतश्लोकी सटीका.
Author - शंकराचार्य / टी.:- ?
Date - ?
Subject - तत्त्वज्ञान, वेदान्त
folio - 48.
Xerox - 93.

KKSU LIBRARY RAMTEK 441 106 M-1851 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाजो भवंति। अथ न केवलं सोगंध्यभाजः। किंतु। अतनुतनुभृतां बहूनां सर्वजातीयानां लोकानां तापं उन्मूलयंति। बहूनामिति
तारतम्यवर्ज्यं। तद्द्वाचार्या द्विधि वशाद्भाग्यवशाल्लब्धबोधाः संतः यदृच्छया सन्निधौ स्थितानां यथाधिकारं कर्मोपासनाज्ञा
नकांडनिरूपिकाभिः सोक्तिभिः स्वैरर्थ्याभिः त्रेधातापं पापं चोन्मूलयंति। विधिवशादिति पदेन बोधलब्धौ दुर्लभत्वं सूचितं॥२॥
॥श्लोक॥ आत्मानात्मप्रतीतिः प्रथममभिहिता सत्यमिथ्यात्वयोगात् द्वेधा ब्रह्मप्रतीतिर्निगमनिगदिता स्वानुभूत्योपपत्त्या॥
आद्या देहानुबंधाद्भवति तदपरा सा च सर्वात्मकत्वादादौ ब्रह्माहमस्मीत्यनुभवउदिते खल्विदं ब्रह्म पश्चात्॥३॥ टीका॥
अथात्मप्रतीतिप्रकारमाह। प्रथमं मूलतत्त्वविचारे क्रियमाणे सत्यं मिथ्या चेति कोटिणः प्रतीतिर्द्वेधा निगमनिगदितावेदो
क्ता। अथ तामेवाह। स्वेति स्वानुभूत्या उपपत्त्या चैवं द्वेधा प्रतीतिः। तत्राद्या स्वानुभूत्या या प्रतीतिः सा देहानुबंधात् शरीरा
क वच्छेदेन भवति। तथोपपत्त्या या प्रतीतिः सा सर्वात्मत्वात्समदृष्टिरूपत्वात्। अथात्र हेतुमाह। आदाविति। आदौ देहावच्छे
देन ब्रह्माहमस्मीत्यनुभवे उदिते सति पश्चात् तदनंतरं सर्वं खल्विदं ब्रह्मेत्युपपत्त्याऽत्मप्रतीतिर्भवति॥३॥ श्लो०॥ आत्मा
चिद्विल्लक्षणात्माऽनुभवपरिचितः सर्वदेहादियंता सत्येवं मूढबुद्धिर्भजति ननु जनोऽनित्यदेहात्मबुद्धिं॥ बाह्यास्थिस्नायु
मज्जापलरुधिरवसाचर्ममेदोयुगंतर्विण्मूत्रश्लेष्मपूर्णं स्वपरवपुरहो संविदित्वापि भूयः॥४॥ टी०॥ एवमुद्देशमात्रेणा
त्मप्रतीतिमभिधायेदानीं विशेषतो निरूपयति। आत्मेति। आत्मा चिद्विल्लक्षणात्मा वर्तते। चित्चैतन्यं। वित् ज्ञानं। लक्षणं

+७ द्वयमासीत्। तथा च सत्यमिथ्यात्वयोगादात्मानात्मप्रतीतिश्च। सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः। सत्यं ज्ञानं मिथ्यात
द्विपरीतमज्ञानं॥ एवं सत्यस्य ब्रह्म +

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमानंदः। तदेतत्त्रयमप्यात्मस्वरूपं। विविधमात्मस्वरूपं उपनिषद्वाक्यैरेव ज्ञातव्यमित्याह। अनुभवेति। किंभूत आत्मा। अनुभवपरिचितः। निरंतराभ्यासेन ज्ञातः। अथ तमेवानुभवमाह। सर्वदेहादियंतेति। सर्वे च ते देहादयश्च इंद्रियप्राणास्तेषां यंता नियंता चालकत्वेन देहनियंता चिद्रूपः। इंद्रियनियंतृत्वेन संविद्रूपः। स्फुरन्नाधानंदरूप इत्यवस्थात्रयेप्यनुभूयते इत्यर्थः। अहो इत्याश्चर्ये। एवं सत्यपि मूढबुद्धिर्जनैः अनित्यदेहादौ आत्मबुद्धिं भजति। अनित्यश्चासौ देहश्च तत्रात्मबुद्धिं देह एवात्मेति मनुते। अथ देहो प्यात्मत्वकल्पना हेभविष्यतीति चेन्नेत्याह। बाह्य इति। देहः बाह्यः अस्थीनि च स्नायवश्च सूक्ष्मशरीरा मज्जा पलं मांसं रुधिरं रक्तं वसा चर्म मेदो शुक्रं अंतविण्मूत्रश्लेष्मपूर्णं एवंविधं जुगुप्सास्पदं स्वपरवपुः स्वकीयं परकीयं वा शरीरं विदित्वापि भूयो देहात्मबुद्धिं भजत इति महदाश्चर्यमित्यर्थः॥४॥ श्लोक॥ देहस्त्रीपुत्रमित्रानुचरहयवृषास्तोषहेतोर्ममेत्थं सर्वे स्वायुर्नयंति प्रथितमलममी मांसमीमांसयेह॥ एते जीवंति येन व्यवहृतिपटवो येन सौभाग्यभाजस्तं प्राणाधीशमंतर्गतममृतममुं नैव मीमांसयंति॥५॥ टी०॥ अथ पुनराश्चर्यमेव दर्शयन्नाह। अमी सर्वे लोका इहास्मिन् जगति इत्थं मांसमीमांसया मांसविचारेणालं पूर्णं स्वायुर्नयंति स्वकीयमायुः परिलयंति। किंभूतमायुः प्राप्य तं वंशविज्ञानादिगुणैः ख्यातमपीत्यर्थः। इत्थं कथमित्याह। देहेत्यादि। देहः स्वदेहः स्त्रीपुत्रमित्रं अनुचरः सेवकः हयोश्वः वृषो बलीवर्दः एते ममतोषहेतवो भवंतीत्यभिमानेन। तथा। एते कृशाः पुष्टा वेति भरणपोषणरक्षणादिभिः दृढप्रेमानुबंधेन स्वायुर्नयंति। देहभृतामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमेव प्रयोजनमिति मत्वा व्यर्थं व्ययीकुर्वंति। अथ रूढमात्मतत्वं तैः परमप्रयोजनत्वेन कथं ज्ञेयं। न तत्र तेषामपराधः। किंतु। तद्गत
मोह्यस्य। अथ तद्वेवाह। एत इति। एते देहस्त्री पुत्रादयः येन कृताजीवंति। तथा येन व्यवहृतिपटवः स्वव्यवहारक्षमा भवंति।
तथा। येन सौभाग्य सौदर्यं भजंति। मृतशरीरे तथात्वदर्शनादित्यर्थः। अंतर्गतं अंतर्यामित्वेन स्थितं प्राणेशं प्राणमुख्यं अमृतं
म्रियमाणेषु देहेषु अप्यमरणशीलममुं अनुभवैकवेद्यं नैव मीमासयंति। न विचारयंतीति महदाश्चर्यमित्यर्थः॥५॥ श्लो०॥
कश्चित्कीटः कथंचित्पटुमतिरभितः कंटकानां कुटीरं कुर्वंस्तेनैव साकं व्यवहृतिविधये चेष्टते यावदायुः॥ तद्वज्जीवोपि नानाच
रितसमुदितैः कर्मभिः स्थूलदेहं निर्मायात्रैव तिष्ठन्ननुदिनममुना साकमभ्येति भूमौ॥६॥ टी०॥ अथ देहात्मसाहचर्यं दृष्टांतेन
दर्शयति। कश्चिदिति। तथा कश्चित्पटुमतिः कीटः क[illegible]थंचिन्निजकफोद्भूतसूत्रप्रयत्नैः कंटकानां कुटीरं कुर्वन्व्यवहृतिविध
येव्यवहारसिद्धये यावदायुश्चेष्टते इतः ततः पर्यटति। तद्वज्जीवोपि नानाचरितसमुदितैः अनेकविधानि चरितानि क्रियमाण
संचितानि तेभ्यः समुदितैः प्रारब्धकर्मभिः देहं शरीरं निर्माय विरचय्य तत्रस्तत्रैव देहे तिष्ठन् अमुना देहेन साकं सहैवा
नुदिनं भूमावभ्येति पर्यटति। अयमर्थः। कंटककुटीरवदचेतनो देहः स्वतो न चलति तथा। देहव्यतिरेकेण तस्य चालकत्वं न युज्य
ते। इत्युभयोः साहचर्यं। अथ प्राप्तोपि देहः पारमार्थिको न भवति। किंत्वविद्याकल्पितत्वात्कृत्रिमो स्तीति। तदनुरूपं नका
र्यमिति दृष्टांतेन द्रढयति॥६॥ श्लो०॥ स्वीकुर्वन्व्याघ्रवेषं स्वजठरभृतये भीषयन्यश्च मुग्धान्मत्वा व्याघ्रोहमित्थं स नरपशु
मुखान्बाधते किंतु सत्वान्॥ मत्वा स्त्रीवेषधारी स्त्र्यहमिति कुरुते किं नटो भर्तुरिच्छां तद्वच्छारीरमात्मा पृथगनुभवतो देहतो
+ ४ मृतशरीरे चलनादर्शनात्। अतस्तस्य कश्चित्चालको वक्तव्यः स एव जीवः। तथाच। रथाश्वन्यायवत्। चालक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्स साक्षी॥७॥ टी०॥ स्वीकुर्वन्निति। यः कश्चित्पुरुषः स्वजठरभृतये भिक्षया स्वोदर पूरणाय कृत्रिमं व्याघ्रवेषं स्वीकुर्वन्नेतेनमु
ग्धान् बालिशांश्च भीषयंस्त्रासयन्नास्ते। सोहं व्याघ्र इति मत्वा नरपशुमुखान् सत्वान् प्राणिनः बाधते। किंतु। व्याघ्रवेषं कृत्रि
मं जानन् तूष्णीमास्ते। व्याघ्रवेषानुरूपं कर्म करोतीत्यर्थः। अथैतदेव दृष्टांतेन द्रढयति। मत्वेति। स्त्रीवेषधारी नटोहं स्त्री
मत्वा भर्तुरिष्टं नकुरुते। स्त्रीवेषानुरूपैर्हावभावैरन्यान् पुरुषान् प्रलोभयति। परंतु स्वयमिति मत्वा रमणयोगेष्टं न
कुरुते। तद्वच्छरीरः शरीरावच्छिन्न आत्मा देहतः देहानुभवेन पृथगस्ति। यतः स साक्षी तटस्थः तेन देहानुरूपा चेष्टा
नकार्या। स्वरूपानुरूपमेव स्थातव्यमित्यर्थः॥७॥ श्लो०॥ स्वबालं रोदमानं चिरसमयमशांतिमानेतुमग्रे द्राक्षं
स्वार्जूरमाम्रं सकदलमथवा योजयत्यंबिकास्य॥ तद्वच्चेतोतिमूढं बहुजननभवान्मौढ्यसंस्कारयोगाद्वो
धोपायैरनेकैरवशमुपनिषद्बोधयामास सम्यक्॥८॥ टी०॥ अथ बहुप्रकारैरात्मप्रतीतिं दर्शयंत्याः
श्रुतेः कौशलमाह। स्वमिति॥ अंबिकां [illegible] रोदनादुपशमं प्राप्नोत्वित्यर्थः। तद्वद्बहुजननभावान्मौढ्यसं
स्कारयोगादवशं चंचलं स इति मूढं अज्ञानापहतं चेतः + माता चिरतरसमयं रोदमानं स्वबालं शांति
मानेतुं तूष्णीभावं प्रापयितुं अस्य बालकस्याग्रे द्राक्षं खर्जूरं आम्रं सकदलं वा योजयति येन केनाप्यभीष्ट
फलेनामुं + उपनिषत्सम्यग्यथाधिकारं अनेकैर्बोधोपायैरात्मज्ञानोपायैर्बोधयामास। आत्मप्रती
तो बहुरूपायेषु प्रोक्तेषु सत्स्वेकोपि प्रतिफलिष्यतीत्यर्थः॥८॥

॥२

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्लोक॥ यत्प्रीत्या प्रीतिपात्रं तनुयुवतितनूजार्थमुख्यं स तस्मात्प्रेयानात्मा थ शोकास्पदमितरदतः प्रेय एतत्कथं स्यात्॥ भार्याद्यं जीवितार्थी वितरति च वपुः स्वात्मनः श्रेय इच्छंस्तस्मादात्मानमेव प्रियमधिकमुपासीत विद्वान्न चान्यत्॥९॥ टी०॥ अथात्मनः सर्वापेक्षया प्रियत्वमाह॥ यदिति॥ तस्माद्वक्ष्यमाणाद्विषयजातात्स आत्मा प्रेयान् परमप्रेमास्पदं भवति। सकः। तनुयुवतितनूजार्थमुख्यं यद्विषयजातं तद्यत्प्रीत्या पात्रं भवति। यस्य प्रीतिर्यत्प्रीतिस्तया सर्वं प्रीतिपात्रं। अत्रायमर्थः। सुखदुःखान्यतरसाक्षात्कारो भोगः स चात्मन एव युज्यते। अतो विषयभोगार्थं प्रवृत्तस्य प्रथममात्मप्रतीतिरुद्दिष्टा। तत्तामूलभूततया उक्तं विषयजातं प्रीतिपात्रं भवति। तत्रापि प्रथमं तनुः शरीरं। भोगसाधनत्वात्। ततो भोगेष्वंतरंगा युवतिस्ततउभयप्रीतिजन्यस्तनुजः पुत्रस्ततस्तन्निर्वाहकोर्थः द्रव्यं। ततो प्रथसाध्यं अन्यदन्नपानवस्त्रतांबूलादिकं प्रीतिपात्रं भवति। तथा च मुख्या प्रीतिरात्मनस्तदधीना गौणप्रीतिरन्येषामिति प्रत्यक्षसिद्धमेवास्ति। एवं यस्य मुख्या प्रीतिः स एवात्मा प्रेयानित्यर्थः। भवत्वात्मा प्रेयास्तथापि विषयजातमपि प्रीतिपात्रत्वादुपास्यमेवेत्यागतमित्याशंक्य विषयेषु प्रीतिपात्रत्वं प्रतिभासितं। तत्र पारमार्थिकं दुःखपात्रत्वमेवास्तीत्याह। इतरं विषयजातं शोकास्पदमित्यनुभवसिद्धं। आदि

प्रीति

त्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्यावसानेषु यद्दुःखं दुःखास्पदमेव। उक्तं च। अर्जने रक्षणे नाशे क्लेशदो विषयो भवेत्। कस्माय सज्जते तत्र मूढधी रतिविस्मय इति। एवमन्वयव्यतिरेकाभ्यां दुःखास्पदमेतद्विषयजातं प्रेयः कथं स्यात्। न स्यादेवेत्यर्थः। तस्मात्कारणाद्विद्वान्पंडितः अधिकं यथा भवति तथा प्रियं प्रियतमं आत्मानमेवोपासीत। न चान्यच्छरीराद्यं। अथात्मनः सर्वेभ्योधिकत्वं प्रकटयति। भार्याद्यमिति। जीवितार्थी पुमान् भार्याद्यं वितरति। पुत्रवित्ताद्यमपि दत्वा स्वात्मानं रक्षति। आत्मानं सततं रक्षेद्दारैरपि धनैरपीत्युक्तत्वात्। अथ शरीरेप्यात्मत्वनिषेधार्थमाह। वपुरिति। आत्मनो जीवस्य श्रेयः कृतातिशयं इच्छन् वपुर्वितरति। भृगुपतनेन गंगाप्रवेशेन क्षात्रधर्मेण वा शरीरमर्पयति। एवमात्यंतिकं प्रियत्वमात्मन एव। शरीरादीनामापेक्षिकमित्यर्थः ॥९॥ श्लो०॥ यस्माद्यावत् प्रियं स्यादिह हि विषयतस्तावदस्मिन् प्रियत्वं यावद्दुःखं च यस्माद्भवति खलु ततस्तावदेवाप्रियत्वं। नैकस्मिन् सर्वकालेऽस्त्युभयमपि कदाप्यप्रियोपि प्रियः स्यात्प्रेयानप्यप्रियो वा सततमपि ततः प्रेय आत्माख्यवस्तु ॥ ॥१०॥ टी०॥ अथापेक्षिकं प्रियत्वं विविच्याह। यस्मादिति। इह विषयभोगे यस्माद्दारादिविषयतः सकाशाद्यावत्सुखं भवति तावदेवास्मिन्विषये प्रियत्वं। तथा। यस्माद्दैर्यादिविषयतः यावद्दुःखं तावदेवास्मिन्नप्रियत्वं। एवमुभयमपि प्रियत्वमप्रियत्वं वा एकस्मिन्विषये सर्वदा नास्ति। यतः कदापि अप्रियोपि कार्यवशात्प्रियः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यात् तथा कदापि अप्रेयान् अपि। भार्यादिविषयनिमित्तवशेन कालवशेन वाऽप्रियः स्यात्। ततः आत्माख्यं वस्तु सततम
पि प्रेयः। अत्र मूलश्रुतिः। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति। तथा तदेत
त्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रो
त्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायु
कं भवति। भाष्यं। याज्ञवल्क्यो मैत्रेयीं प्रति वदति। अरे मैत्रेयी पुत्राणां कामाय पुत्राः प्रिया न भवन्ति। किं त्वात्मन
स्तु कामाय पुत्राः प्रिया भवन्ति। प्रथमतः स्वीय आत्मा प्रियः स्यात्तर्हि तदर्थं पुत्रा मृग्यन्ते। यथा पुत्राय कदलीफले
न भाव्यं इति रथ्यां गतस्य मुख्या पुत्रप्रीतिरेवो दृष्टा। तदर्थं फलादेः तद्वन्मुख्यात्मप्रीतिस्तदर्थं पुत्रादिप्रीतिः। एव
मात्मप्रीतिशेषत्वेनैव सर्वेषां प्रीतिः। अथ तदेतदिति। तत्र तत्र पुत्रवित्तयोरीषणाति प्रियत्वेन दुस्त्यजा। अथ तदे
तदात्माख्यं वस्तु पुत्रात्प्रेयः स्वभावतः पुत्रः प्रेयान् तदपेक्षयाप्यतत्प्रियः इत्यर्थः। तथैव वित्तादपि प्रेयः। अथ किं
प्रत्येकं वक्तव्यं। अन्यस्मादपि सर्वस्मात्प्रीतिः पुत्रात्प्रेयः न हि केवलं वाङ्मात्रेणास्य प्रियत्वं अतो युक्तिमाह। अंतर
तरमिति। यद्यस्मात्कारणात् स अयमात्मा अंतरं भवति। अंतरतरमित्यांतरं। आतरं पुत्रादि। ततोऽप्यतरं युक्त्यंतर
माह। अन्यमिति। अथात्मनः सकाशादन्यं प्रियमिति ब्रुवाणं पुरुषं प्रतीति ब्रूयात्। इतीति किं तवाभिमतं यत्पुत्रवित्तादि
प्रियं तद्रोत्स्यतीति शोकास्पदं भवति। उत्पत्तिस्थितिविनाशादिकालत्रयेऽपि दुःखहेतुत्वात्। एवं यस्मा दुःखं भवति तत्कथं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रियत्वेन गण्यते। तदुक्तं भगवता। ये हि संस्पर्शजा भोगा दुःखयोनय एव ते॥ आद्यंतवंतः कौंतेय न तेषु रमते बुधः इति॥
तथा। यथा विषया दुःखहेतवः [illegible]ह इति किमर्थं ईश्वरः किं तथैवस्यान्नैवेत्यर्थः। तस्मादात्मानमेव मुदासीत नपु
त्रादि। एवं य आत्मानमेवोपास्ते अस्य ह इति निश्चयेन प्रियं पुत्रवित्तादिकं प्रमायुक्तं प्रमाविषयो न भवति नस्फुर
ति। घृतस्वादे तैलभक्षणवदित्यर्थः। तदुक्तं भगवता। यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः इति॥४॥ श्लो०॥
श्रेयः प्रेयश्च लोके द्विविधमभिहितं काम्यमात्यंतिकं च काम्यं दुःखैकबीजं क्षणलवविरसं तच्चिकीर्षंति मंदाः॥
ब्रह्मैवात्यंतिकं यन्निरतिशयसुखस्यास्पदं संश्रयंते तत्वज्ञास्तच्च काठोपनिषदभिहितं षड्विधा पंचवल्यां॥
॥११॥ टी०॥ अथात्र कठशाखोपनिषत्संवादयति। श्रेय इति। लोके श्रेयः प्रेयश्च द्विविधमभिहितं प्रोक्तं श्रेयः सुकृत
साधनं प्रेयः प्रेमास्पदं। द्विधा काम्यमात्यंतिकं च। काम्यं श्रेयः फलोद्देशेन क्रियमाणं उपयाचितादिकं च। आत्यंतिकं
मोक्षसाधनं। तथा प्रेयोपि काम्यं जायापुत्रादि। आत्यंतिकं आत्मारव्यं। तत्र श्रेयः प्रेयो वा यत्काम्यं तद् दुःखैकबीजं
दुःखनिदानं। तर्हि तत्र लोकानां प्रवृत्तिः कथं दृश्यते इत्यत आह। क्षणलवविरसं। शुक्तिरजतवन्निमिषमात्रं दृष्टिरम्य
तन्मंदा मूर्खाश्चिकीर्षंति वांछंति। तथा आत्यंतिकं श्रेयः प्रेयो वा ब्रह्मैव। यतो निरतिशयसुखस्यास्पदं तच्च
ज्ञाः श्रयंते इत्येतत्प्रमेयं कठवल्ल्युपनिषदि अभिहितं अथ कठोपनिषदो बहुधा पठिताः संति प्रकृते एतत्प्रमेयं
कुत्रस्थले निरूपितमस्तीत्याह। षड्विधा पंचवल्यां॥५॥

॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥आत्मांभोधेस्तरंगोऽस्म्यहमिति गमने भावयन्नासनस्थः संवित्सूत्रानुविद्धो मणिरहमिति वाऽ
स्मींद्रियार्थप्रतीतौ॥ दृष्टोऽस्म्यात्मावलोकादिति शयनविधौ मग्न आनंदसिं[illegible]धावंतर्निष्ठो मुमुक्षुः
स खलु तनुभृतां यो नयत्येवमायुः॥१२॥ टी०॥ अथ ब्रह्मैकत्वभावनया निष्पन्नस्यांतर्निष्ठस्य स्वरूपं श्लोकद्व
येनाह। एवं निरूपितप्रकारेण यो मुमुक्षुः आयुर्नयति परिकलयति सोंतर्निष्ठ इत्युच्यते। अथ किं कुर्वन्नायुः परि
कलयतीत्याह। आत्मेति। गमने अहमात्मांभोधेस्तरंग इति भावयन् स्थानांतरचलने सति यथा तरंगो बाह्या
भ्यंतरतो जलमय एव सन्नितस्ततश्चलति। एवमहं जीवोपि अगाधस्यात्मसमुद्रस्य तरंग इवास्मीति भावयन् गच्छ
तीत्यर्थः। क्रीडन्नुर्मीरूपामिवेति श्रुतेः। आसनस्थो यथास्थितो मुमुक्षुः संवित्सूत्रानुविद्धो मणिरस्मी
तिभावयन् संविद्रूपं सूत्रं तेनानुविद्धः प्रोतः अहं जीवलक्षणो मणिरस्मीति भावयन्नास्ते। मयि सर्वमिदं प्रोतं सू ॥दृष्ट
त्रे मणिगणा इवेति भगवद्वचनात्। एवं देहव्यापारे अंतर्निष्ठत्वं दर्शयन्निदानीं इंद्रियव्यापारे दर्शयति। इंद्रियार्थ
दृ
प्रतीतौ सत्यां आत्मावलोकादात्मदर्शनान्ममेदानीमात्मदर्शनं वृत्तमिति मत्वा दृष्टोस्मीति भावयन्। अथेंद्रियो
परमे त्वाह। शयनविधौ सुषुप्तिकालेंतेऽहमानंदसिंधौ मग्नोऽभूवमिति भावयन्॥१२॥ श्लो०॥ वैराग्यव्यष्टि
ष्टि
रूपं जगदखिलमिदं नामरूपात्मकं स्यादंतस्थप्राणमुख्यात् प्रचलति न पुनर्वेत्ति सर्वान्पदार्थान्
॥नायं कर्ता न भोक्ता सवितृवदिति यो ज्ञानविज्ञानपूर्णः साक्षादित्थं विजानन्व्यवहरति परात्मानु
संधानपूर्वी॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ द्वितीयं श्लोकमाह। ज्ञानं शास्त्रोत्थं विज्ञानमनुभवस्ताभ्यां पूर्णो यः पुमान्भवति साक्षादित्थमिति विजानन् आत्मानु
संधानपूर्वं व्यवहरति। इतीति किमित्याशंक्याह। वैराज्येति। अत्रैतदुक्तं भवति। आत्माकारान्तःकरणवृत्तिः पुमान्
यदा बाह्यदृष्टिर्भवति तदा नामरूपात्मकमखिलं समग्रं विचित्रं जगत्स्थूलसमष्टिरूपविराजो ब्रह्मणो व्यष्टिरूपमिति व्यष्टि
पश्यन्कुत्सानिंदासूयाव्यतिरिक्तः सन्व्यवहरति। तथा व्यष्टिरूपं जगदं तस्य प्राणमुख्या चिद्रूपा प्रचलति व्यापारं
करोति। तस्मादेवं सं विद्रूपान्पदार्थान्वेत्तीति विजानन् तदनुसंधानपूर्वमेव व्यवहरति। तथायमात्मा सवितृवत्सूर्य
वन्नकर्ता चालकत्वेपि कर्तृत्वाभिमानशून्यः। तथा न भोक्ता पदार्थग्राहकत्वेपि भोक्तृत्वाभिमानशून्यः। तद्व्यवह
रतीति तात्पर्यं॥१३॥ श्लो०॥ नैर्वेद्यं ज्ञानगर्भं द्विविधमभिहितं तत्र वैराग्यमाद्यं प्रायो दुःखावलोकाद्भ
वति गृहसुहृत्पुत्रवित्तेषणादेः॥ अन्यत्तु ज्ञानोपदेशाद्यदुदितविषये वांतवद्धेयतास्यात्प्रव्रज्यापि
द्विधास्यान्नियमितमनसां गेहतो देहतश्च॥१४॥ टी०॥ अथ विकार वैराग्यमाह। तत्र विज्ञानोपाये वैराग्यं
द्विविधमभिहितं प्रोक्तं। अथ तस्य द्वैविध्यमाह। कै नैर्वेद्यं अपरं ज्ञानगर्भं च। निर्वेदाद्दुःखादुत्पन्नं नैर्वेद्यं। तदेवाह।
ए गृह आद्यं नैर्वेद्यं सुहृत्पुत्रवित्तेषणादेः प्रायो दुःखाद्भवति। एतदग्रे दुःखजनकं भविष्यतीति वृश्चिकस्पर्शवत्। दुःख
दर्शनाभ्यां द्वियेते आदत्तमपित्यज्यते। अथ ज्ञानगर्भं वैराग्यमाह। अन्यदिति। अन्यत् द्वितीयं ज्ञानोपदेशाद्भवति।
प्रथमं दुःखदर्शनादित्युक्तं। अनंतरं आत्मातिरिक्तं सर्वं दुःखरूपमित्याद्युपदेशादुदितविषये उक्तविषये सुहृत्पुत्र

ज्य

॥६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलत्रादिषु तत्त्ववदेयता स्यात्। यथा जुगुप्सायां जातायां सति पुनस्तद्ग्रहणेच्छा नोदेति तद्वत् विषये वैराग्यस्य ज्ञानात् पुनर्विवेकिनस्तद्ग्रहणेच्छा नोत्पद्यते। तदुक्तं वासिष्ठे। बुध्वाप्यत्यन्तवैरस्यं यः पदार्थेषु दुर्मतिः। बध्नाति वासनां भूयो नरो नासौ नरो गर्दभ इति। अथ प्रव्रज्यापि द्विविधा भवति। प्रथमं गेहतो गृहात् प्रव्रज्या। अपरा देहतश्च। देहाभिमानशून्यत्वमेव देहतः प्रव्रज्येत्यर्थः॥९४॥ श्लो०॥ यः कश्चित्सौख्यहेतोस्त्रिजगति यतते नैव दुःखस्य हेतोर्देहे हंता तदुत्था स्वविषयममता चेति दुःखास्पदे द्वे॥ जानन् रोगाभिघाताद्यनुभवति यतो नित्यदेहात्मबुद्धिर्भार्यापुत्रार्थनाशे विपदमथ परां मेति नाराति नाशे॥९५॥ टी०॥ अथोपदेशप्रकारमाह। त्रिजगति लोकत्रयेपि यः कश्चित्पुरुषः सौख्यहेतोः सुखं मे भूयादिति यतते प्रयत्नं करोति। परं तु दुःखस्य हेतोः नैव यतते। एवं सति या देहे अहंता तथा तदुत्था देहहितार्थमुत्पन्ना स्वविषयममता चेति दुःखास्पदे दुःखस्थाने भवतः एवं जानन्नपि नित्यदेहात्मबुद्धिः पुरुषः रोगाभिघाताद्यनुभवति। रोगो ज्वरादि अभिघातस्ताडनादि। एवं देहोहमिति बुध्या रोगाभिघातादि दुःखमनुभवति। तथा भार्यापुत्रादिषु ममताभिनिवेशेन परामुत्कृष्टां विपदमेति प्राप्नोति। परं त्वहं ममताशून्यो दुःखी न भवति। यथा आराते वैरिणो नाशे सति ममताशून्यत्वाद् दुःखी न भवति। तथा च। यत्राहं ममता वा तत्रैव दुःखसाहचर्यमिति। धूमवन्हिसाहचर्यवन्निश्चितमित्यर्थः॥९५॥ श्लो०॥ निष्टन्वोहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४+ तिनस्पृशति। कइव गेहे तिष्ठन् अतिथिरिव मार्गस्थ इव। किंभूतोऽतिथिर्निजधाम गंतुं चिकीर्षुश्च स्वं ग्रामं गंतुमिच्छुः क्षणमधिवासस्थलं प्राप्तस्या +४

गृहेशोप्यतिथिरिव निजं धाम गंतुं चिकीर्षुर्देहस्थान् दुःखसौख्यान्न भजति सहसा निर्ममत्वाभिमानः॥ आयात्यप्यास्यतीदं जलदपटलवद्यात्ययास्यत्यवश्यं देहाद्यं सर्वमेव प्रविदितविषयोयश्च तिष्ठत्ययत्नः॥१६॥ टी॰॥ अथगृहाद्बहिः प्रव्रजितुमशक्तस्य विवेकिनोपि पुरुषस्य मोक्षोपायमाह। तिष्ठन्निति। गृहेशो गृहस्थः गेहे तिष्ठन्नपि देहस्थान् दुःख सौख्यान्न भजेत्स्मात् अथः गंतव्यमस्तीति कृतनिश्चयस्य यथा निस्पृहत्वं तथैव प्रकृतेपीत्यर्थः। किंभूतो गृहस्थः निर्ममत्वाभिमानः ममताभिमानशून्यः तर्हि तेष्वागतेषु वा विषयेषु कथमुदासीन इत्याह। आयात् आगमिष्यद्देहादि पदार्थजातमवश्यमास्यत्येव। तथा। यात् गमिष्यद्वस्तु यास्यत्येव। किंवत् जलपटलवत् जलदपटलं स्वप्रयत्नेन नायाति विधिवशाद्यातमपि स्वप्रयत्नेन न निरुंधति। एवमित्थं प्रविदितविषयः प्रविदितोऽन्वयव्यतिरेकेण ज्ञातः विषयोभिप्रायो येन स तथाभूतः पुरुषः अयत्नः सन् गृहे तिष्ठति॥१६॥ श्लो॰॥ शक्त्या निर्मोकतः स्वाद्बहिरहिरिव यः प्रव्रजन्स्वीयगेहाच्छायामार्गद्रुमोत्थां पथिक इव मनाक्संश्रयेद्देहसंस्थां॥ स्पृत्वपर्यापृतरूभ्यः पतितफलमयं प्रार्थयेद्भैक्ष्यमन्नं स्वात्मारामं प्रवेष्टुं स खलु सुखमयं प्रव्रजेद्देहतोपि॥१७॥ टी॰॥ अथ प्रागुक्ता द्विविधा प्रव्रज्या पृथगनुवदति। शक्त्येति। यः पुरुषः शक्त्या वैराग्यबलेन स्वीयगेहात्सकाशात्सर्पोयथा निर्गच्छति कंचुकं त्यक्त्वा बलेनेति

७

१३

छाया बहिर्याति। तथा पुत्रकलत्र धनादि स्नेहानुबंधेन दुस्त्यजमपि स्वगृहं बलेन व्रजति। तथा यः देहसंस्थां जी
वनोपायं मनाक् संश्रयेत्। क इव। मार्गद्रुमोत्थां छायां पथिक इव। अग्रे गंतव्यमस्तीति द्रुमछायायां क्षणं
विश्रमते न तु तत्रास्थां करोति। अथ देहधारणार्थं निर्वाहमाह। नरेभ्यः सकाशात् स्वकल्पयितं भैक्ष्यमन्नं
प्रार्थयेत्। न संग्रहबुध्या। किंभूतम् अं पतितफलमयं वातादिना पतितानि यानि फलानि तन्मयं न तु फल
च्छेदेन। अथ देहाभिमानमपि त्यजेदित्याह। सपुरुषः सुखमयं सुखस्वरूपं स्वात्मारामं प्रवेष्टुं देहतोपि प्र
व्रजेत्। देहाभिमानशून्यत्वमेव देहतः प्रव्रज्येत्यर्थः॥१७॥ श्लो०॥ कामो बुद्ध्यावुदेति प्रथममिह
मनस्युद्दिशत्यर्थजातं तद् गृह्णातींद्रियास्येस्तदनधिगमतः क्रोध आविर्भवेच्च॥
प्राप्तावर्थस्य संरक्षणमतिरुदितो लोभ एतत्त्रयस्यात् सर्वेषां पापहेतुस्तदिह मति
मता त्याज्यमध्यात्मयोगात्॥१८॥ टी०॥ इदानीं कामक्रोधलोभाः सर्वेषां पापहेतवो भवंती
त्याह। काम इति। मूलभूतः कामोभिलाषः प्रथमं बुद्धावुदेति। ततो मनस्यर्थजातं पदार्थजातं रूपरसादि
तन्मध्ये ऽमुकेन भवितव्यमित्युद्दिशति संकल्पविषयं करोति। ततस्तत्पदार्थजातं इंद्रियास्यैश्चक्षु र्थ
रादींद्रियमुखे गृण्हाति गृहीतुं यतते। एवं कृतेपि यत्नेन तदनधिगमतस्तेषामनधिगमेः अनेकांतरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यैरप्राप्तिस्तया क्रोध आविर्भवति। कामात्क्रोधोऽभिजायत इति भगवद्वचनात्। अथ दैववशादर्थस्य प्राप्तौ नानो
पायैस्तद्रक्षणार्थे या मतिः स्वीयत्वाभिमानः स एव लोभ उदितः एवमेतत्त्रयं कामक्रोधलोभरूपं सर्वेषां जीवा
नां पापहेतुः सकलदुःखस्वरूपसंसारकारणमित्यर्थः। तस्मादेतन्मतिमता पुरुषेण त्याज्यं कुतः अध्या
त्मयोगात्। बुद्धेः परतो वर्तमानमध्यात्मं प्रत्यगात्मरूपं तस्य योगान्निरंतरानुसंधानरूपादभ्यासयोगादि
त्यर्थः॥१८॥ श्लो०॥ दानं च स्वार्पणं यत्क्रियत इह नृभिः स्यात्क्षमा क्रोधसंज्ञा श्रद्धास्ति
क्यं च सत्यं सदिति परमतः सेतुसंज्ञं चतुष्कं॥ तस्याद्बंधाय जंतोरिति चतुर इमान्दान
पूर्वैश्चतुर्भिस्तीर्त्वा श्रेयोमृतं च श्रयतु इह नरः स्वर्गतिर्ज्योतिराप्तं॥१९॥ टी०॥ एवं कामक्रो
धादिदैत्यनिबर्हणेन देवत्वप्राप्तिरित्यस्मिन्नर्थे सामवेदोक्तकल्माषसामसंवादयन्नाह। दानमिति। नृभि
र्मनुष्यैर्यद्द्रव्यार्पणं व्ययी क्रियते तद्दानमिति प्रोक्तं। तथा या अक्रोधसंज्ञा क्षमा प्रोक्ता। तथा आस्तिक्यं अस्ते
यानेन प्रयोजनमिति विश्वासरूपिणी बुद्धिः श्रद्धेत्युच्यते। तथा सत्यं सदिति ब्रह्मेति चतुष्टयं मुक्तेः साधनं।
अत एभ्यः परमन्यद्विरुद्धस्वरूपं चतुष्कं सेतुसंज्ञं भवति। अदानं क्रोधः अश्रद्धा असत्यमिति यत्सेतुचतु
ष्टयं तत् जंतोः प्राणिनः बंधाय भवति इति कारणादिमान्पूर्वोक्तान् चतुरः सेतून् दानपूर्वैश्चतुर्भिस्तीर्त्वा उल्लं

॥८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्य नरः पुरुषार्थी श्रेयः अमृतं स्वर्गतिं ज्योतिराप्तिं च श्रयते प्राप्नोति। श्रेयः सुकृतातिशयं अमृतं देवत्वं स्वर्गतिं
ऊर्ध्वगतिं ज्योतिराप्तिं च प्राप्नोतीत्यर्थः। अत्र श्रुतिः। हाउ ३ सेतूंस्तर दुस्तरान्। दानेनादानं हाउ ३ अहमस्मि ना
प्रथमजा ऋता ३ स्य हाउ ३ सेतूंस्तर दुस्तरान्। अक्रोधेन क्रोधं हाउ ३ पूर्वं देवेभ्यो अमृतस्य ना ३ भा
यि हाउ ३ सेतूंस्तर दुस्तरान् श्रद्धया अश्रद्धां हाउ ३ यो मा ददाति स [illegible] इदेव मावा हाउ ३ सेतूंस्तर दुस्तरा
न् [illegible] सत्येनानृतं हाउ ३ अहमन्नमन्नमदन्तमद्मि हाउ ३
वा एषा गतिः एतदमृतं स्वर्गच्छ ज्योतिर्गच्छ सेतूंस्तीर्त्वा चतुराह। भाष्यं। तत्र विकल्पे हाउ निगद्यते। अदीर्घ
दीर्घवत्कुर्यादित्यादि साम शिक्षोक्तमनुस्मरणीयं। तत्र चतुरः सेतून् तरेत्यन्वयः। सेतुर्यथा जलप्रवा
हभेदको भवति। तथा अखंडैकरसभेदकाश्चत्वारः सेतवो भवंति तानुत्तर उल्लंघयेत्युपदिशति। किंभू
तान्सेतून् उपायांतरेण दुःखेन तर्तुमशक्यान्। अथ सेतून् तथा तदुल्लंघनोपायांश्च कथयति। दानेनेति।
तत्र ब्रह्मार्पणेन यद्दीयते तद्दानशब्दो नामाव्ययं। तदन्यद्देहभार्यापुत्राद्यर्थं यद्व्ययीक्रियते तदादानं। एवं दा
नशब्देनादानमुक्तं ध्यदेहार्थं व्ययीकृतमपि ब्रह्मार्पणमिति ज्ञात्वा एतेकुर्वीतेत्यर्थः। यदुक्तं भगवता। यत्क
रोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति। अथ ज्ञानप्रकारमाह।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहमस्मीति। अहं ऋतस्य सत्यस्य ब्रह्मणः प्रथमजोऽस्मि प्रथमं सर्वस्मात्प्राक् जात [illegible] इति प्रथमजः शबलत्वे नोपस्थित भार्यापुत्रकलत्रादिष्वंतर्गतो हिरण्यगर्भोऽहमस्मीति ज्ञात्वा ब्रह्मार्पणमेव सर्वमिति भावयेदित्यर्थः। तथाहा ३ उ इत्यथवा अक्रोधेन क्षमारूपेण क्रोधं द्वितीयसेतुं तर। तत्रोपायमाह। पूर्वमिति। देवेभ्यो मनुष्यक्षरादिभ्यः सकाशात्पूर्वं अमृतस्य ब्रह्मणो नाभिः बुद्धिरूपेण तारकोऽहमस्मि। बुद्धिपर्यंतमेव क्रोधस्तत्तोग्रे ब्रह्मैवास्मीति भावय। यो बुद्धेः परतस्तु स इति भगवदुक्तेः। तथा श्रद्धया कृत्वा अश्रद्धां तृतीयसेतुं तर। अस्त्येव परमात्मना परमप्रयोजनमिति भावयन्। तत्रोपायमाह। य इति। यः पुरुषः मा इति महां ददाति सर्वं निवेदयति स देवः आवा प्राप्तवानिति आस्तिक्यविश्वासाद् श्रद्धां तृतीयसेतुं तरेत्यर्थः। अथ सत्येन ब्रह्मणा अनृतं प्रातिभासिकं विश्वा [illegible]कारं तर। तत्रोपायमाह। अहमिति। अहं जीवरूपेण अन्नमद्मि तथा प्रलये अन्नमदं तं भक्षयंतं अग्न्याद्युपाधिभूतं सर्वं अग्न्याहुति प्रक्षेपय नूनं होमि। यो वशिष्येत सोऽस्म्यहमिति भावयेदित्यर्थः। एवमेषोक्तप्रकारो गतिरूर्ध्वारप्रकारा। एतदुक्तप्रकारममृतं मोक्षः। अनेनोपदेशेस्वर्गम् तथाज्योतिरमृतं गच्छेत्युपदेशः॥१९॥ श्लो०॥ अन्नं देवातिथिभ्योऽर्पितममृतमिदं चान्यथा मोघमन्नं यश्चात्मार्थं विधत्ते तदिह निगदितं मृत्युरूपं हितस्य॥ लोके सौके वलाघो भवति तनुभृतां केवलादी च यस्यात्यक्त्वा प्राणाग्निहोत्रं विधिवदनुदिनं योऽश्नुते सोऽपि मृत्युः॥२०॥

॥९

॥टी०॥ देवातिथिभ्योऽर्पितमन्नममृतं भवति देवेभ्यो वैश्वदेवकर्मणि अतिथिभ्यश्च वैश्वदेवान्ते समागतेभ्योऽ
र्पितं यदन्नं तदमृतं स्यादित्यर्थः। अन्यथा एतदकरणे देवातिथिवंचनेन मोघं निष्फलं मन्नं भवति। यश्चात्मा
र्थं पिंडपोषणार्थमन्नं विधत्ते तत्तस्य मृत्युरूपं परिणामे विषोपमं भवति। असात्विकत्वात्। एवं यः पुमा
न् केवलमत्तीति केवलादी स च केवलाघो भवति। केवलमघरूपो भवतीत्यर्थः। अत्र श्रुतिः। मोघमन्नं
विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य। नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी
॥२०॥ श्लो०॥ लोके भोजः स एवार्पयेति गृहगतायार्थिनेन्नं कृशाय यस्तस्मै पूर्णमन्नं भवतिं वि मरु
धौ जायतेऽजातशत्रुः॥ स सख्ये नान्नार्थिने योर्पयति न स सखा सेवमानाय नित्यं संसक्ता
यान्नमस्माद्विमुख इव परावृत्तिरिष्येत्कदर्यात्॥२१॥ टी०॥ लोके स एव भोजो दाता यः गृहागता
यार्थिनेन्नमर्पयति। किंभूताय कृशाय दरिद्रपीडिताय। अथ तस्य फलमाह। तस्मै दात्रे मखविधौ लौकि
केवा यज्ञे पूर्णमन्नं भवति। तथा अन्नदानात् अजातशत्रुर्भवति तस्यान्नदानेन सर्वभूतांतरस्थाः सर्वे
देवाः संतृप्ता भवंति। अतो वैरिणोपि मित्राणि भवंतीत्यर्थः। अथ व्यतिरेकमप्याह। सख्य इति। यः अन्नार्थिने पुर
सख्ये सखिभूताय स्वर्गप्रापकाय नार्पयति स सखा न भवति। ~~ससख्य~~ किंतु पिशुन एवेत्यर्थः। किंभूता
य नित्यं सेवमानाय आश्रिताय तथा संसक्तायानन्यशरणाय। अनेन सर्वभूतेष्वपि अन्नदानं न करोतीत्युक्तं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रि इ

अथ याचको पि अस्मात् कदर्यात् कृपणाद् विमुखः पराङ्मुख इव परावृत्तिं रिच्छेत्। पुनस्तं याचयेत्। अन्यदातारं गच्छेदित्यर्थः। श्रुतिरपि। स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय। अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायं। न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः। अपास्मात् प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत्। भाष्यं। अन्वयमुखेन प्रशंसति। स इत् स एव भोजो दाता यः गृहवे प्रति गृहीत्रे तत्राप्यन्नकामाय चरते गृहमागताय दारिद्र्येण कृशाय एतादृशायातिथयेऽन्नं ददाति। यामहूतौ यामागंतारो देवा आहूयंते यत्रेति यामहूतिर्यज्ञः तस्मिन्नस्मै दात्रे फलं अरं अलं पर्याप्तं भवति कामप्रदं भवतीत्यर्थः। उतापि च अपरीषु अन्यासु शात्रवीषु सेनासु सखायं कृणुते। तस्य सर्वे सखाय एव गतशत्रव इत्यर्थः। अथ व्यतिरेकान्वयाभ्यामाह। स पुरुषः सखा न भवति। यः सचाभुवे सर्वदा सहभवनशीलाय तथा सेवमानायोपसर्जनीभूताय सख्ये जनाय पित्वः पितून्नानि न ददाति न प्रयच्छति स सुहृन्न भवतीत्यर्थः। अ[illegible]पास्माद्दातुः सख्युः स अपप्रेयात् अपगच्छेत्। यद्येनं परित्यज्य गच्छेत् तदोकः स्थानं नास्ति न भवति अरण्यतुल्यं स पुरुषः अन्यं पृणंतं अन्नदातारं अरणं शरणं गच्छेत् कामयेत्॥२१॥ श्लो०॥ स्वाज्ञान ज्ञानहेतू जगदुदयलयो सर्वसाधारणो स्तो जीवेष्वात्स्वर्णगर्भं श्रुतय इति जगुर्हूयते स्वप्रबोधे॥ विश्वं ब्रह्मण्यबोधे जगति पुनरिदं हूयते ब्रह्मरूपं भुक्तौ रोप्यं च रोप्ये धिकरणमथवा हूयते न्योन्यमोहात्॥२२॥ टी०॥ जगदुदय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लयौ स्वाज्ञानहेतू स्त: जगतो नामरूपात्मकस्य चराचरस्योदय: प्रादुर्भाव: लयश्च प्रलय: एतौ स्वस्याज्ञानं च ज्ञा
नं च स्वाज्ञानेज्ञानेन एव हेतव: कारणं ययोस्तौ। स्वशब्देनात्मा। तथा चात्माज्ञानाज्जगत्प्रादुर्भाव:। तथा चात्मा
ज्ञानाज्जगत्प्रलय इत्यर्थ:। एतौ आ स्वर्णगर्भं हिरण्यगर्भं मर्यादीकृत्य सर्वजीवेषु साधारणौ हिरण्यगर्भ: स्वस्व
रूपं विस्मृत्याहमीश्वरो नियन्तेत्यभिमानं वहति तदा प्रादुर्भूतं विश्वाभासं पश्यति। अथ यदा ब्रह्माहमस्मीति स्व
रूपे लीनो भवति तदा विश्वाभासविलय: इति श्रुतयो जगु:। एवमेव जीवेष्वपीति प्रकटयन्नाह। हूयत इति
स्वप्रबोधे ब्रह्माकारान्त:करणवृत्तौ जातायां विश्वं ब्रह्मणि हूयते। अग्नावाहुतिप्रक्षेपवद्भस्मसात्क्रियते। तदा
देहाभिमानित्वात् अवबोधे सति इदं ब्रह्मजगति हूयते नास्त्येव क्रियते। अत्र दृष्टान्तमाह। यद्वदिति। भ्रमनिवृत्ति
काले शुक्तौ रौप्यं हूयते तथा प्रतिभासकाले तु अधिकरणं शुक्ति: रौप्ये हूयते। कस्मादन्योन्यमोहात् शुक्त्यज्ञा
नेरजतोदय: रजताज्ञाने शुक्तिरित्यर्थ:॥२२॥ श्लो०॥ तुच्छत्वान्नासदासीद्गगनकुसुमवद्भेदकं नो

गति सदासीत् किं त्वाभ्यामन्यदासीद्व्यवहृतिगसन्नास लोकस्तदानीं॥ किं त्वर्वागेव शुक्तौ रजत
वदपरो नो विराड्व्योमपूर्व: शर्मण्यात्मन्येतत् कुहकसलिलवत्किं भवेदावरीव:॥२३॥ टी०॥
ननु नामरूपात्मकस्य दृश्यमानस्य जगत: कर्तृ उपादानकारणं किं स्यादिति विचार्यमाणे न तावत्तुच्छस्यानीहस्य
ब्रह्मणस्तथात्वमुपपद्यते। अथ तदतिरिक्तस्य तथात्वकल्पने किमसत्सद्वा कल्पनीयं। तत्राद्यं निषेधति। तुच्छत्वा

त्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिति। तत्र तावज्जगदुपादानकारणं असन्नासीत्। कुतः तस्यासतो गगनकुसुमवत्तुच्छत्वात्। अत्यंतासत्वेन उपादान
कारणत्वानर्हत्वात्। अथवा पि भेदकं सद्वाच्यं। परमार्थतो ब्रह्मणः सकाशादन्यस्य भेदजनकस्यासंभवात्। अतः
परिशेषात्स द्विलक्षणमासीदित्याह। किंचिति। आभ्यां सदसभ्यां अन्य द्विलक्षणमासीदिस्यतो भवति। ननु त
र्हि ब्रह्मातिरिक्तं परमार्थः सन्मास्तु तथापि व्यवहारः सदासीदेवेति चेत्तदपि निषेधति व्यवहृतीति। तदानीं व्यवहा
रस्याप्यभावादित्यर्थः। तदानीमिति पदेन सृष्टेः प्राङ्नासीत् किंतु परिशेषात् मध्य एवोत्पन्नमिस्यतंभवति।

ननु तदानीं याकारश्चन्नास्ति। तथापि व्योमासीत्तथा महद्भूतारब्धो विराड्प्यासीदिति चेत्तदपि निषेधति। नो विराट्
व्योमपूर्व इति व्योम पूर्वं कारणीभूतं यस्य स तथा। अथा स्तां मध्य एवोत्पन्नं तस्य पृथग्भूतत्वेन ब्रह्मण आवरक
त्वं भवेत्तदपि दृष्टांतेन निषेधति। शर्मणीति। शर्मणि शुद्धे ब्रह्मणि तत्किमावरीवः आवृणोतीत्यावरीवः आव
रकं भवेन्नेत्यर्थः। किंवत् कुहकसलिलवन्मायया स्थले जलभ्रममुत्पादयतः कुहकस्यैंद्रजालिकस्य क्षणमुत्प
न्नसलिलभ्रमनिवृत्तौ सत्यां किं स्थलस्यावरकं भवेत् न हृत्प्ररुतेपीत्यर्थः॥२३॥ श्लो०॥ बंधो जन्मात्यया त्मा
यदि न पुनरभूत्तर्हि मोक्षोपि नासीद्यदुद्रात्रिर्दिनं वा न भवति तरणौ किंतु दृग्दोष एषः॥ अप्राणं
शुद्धमेकं समभवदथ तन्मायया कर्तृसंज्ञं तस्मादन्यश्च नासीत्परिवृतमजया जीवभूतं तदेव॥२४॥
॥टी०॥ अथ वस्तुतो ब्रह्मरूपाणामेव जीवानां बंधमोक्षावप्यज्ञानकृताविव्याह। बंध इति। पुनर्जन्मात्यया त्मा मुक्तरूपोप

॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैस्वभावतः

दिबंधो नासीद्यदि तर्हि मोक्षोऽपि नासीत्तदुक्तं। बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः। तथा द्वितीयस्याभावात्को
बद्धः कश्च मुच्यत इति। अत्र दृष्टांतमाह। यद्वदिति। तरणौ सूर्ये रात्रिं दिनं वा न भवति न युज्यते। कथं तर्हि रात्रि
दिनव्यवहारो भवतीत्याह। एवदृग्दोषः जगच्चक्षुषां सूर्यदर्शनमेव रात्रिदिनव्यवहारनिमित्तसा[illegible]पेक्षमि
त्यर्थः। अथ जीवत्वोपाधिनिमित्तमाह। अप्राणमिति। अप्राणो ह्यमनाः शुभ्र इति श्रुत्युक्तस्य ब्रह्मणः प्राणसं
बंधाभावात्। अप्राणमेकमद्वितीयं तन्मायया कर्तृसंज्ञं हिरण्यगर्भाख्यमभवत्। तस्मादन्यन्नासीत्तद्देवा
जयामायया परिवृतं सज्जीवभूतं जीवत्वं प्राप्तं न कुक्षिज्जीवोऽस्तीत्यर्थः। अत्र श्रुतिरियं कश्चित्पूर्वश्लोकेन
पठनीया शुद्धे ब्रह्मणीत्यर्थः। नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्। किमावरीवः कुह
कस्य शर्मन्नंभः किमासीद्गहनं गभीरं॥२४॥ श्लो०॥ प्रागासीद्भावरूपं तम इति तमसा गूढमस्मा
दतर्क्यं क्षीरांतर्यद्वदंभो जनिरिह जगतो नामरूपात्मकस्य॥ कामाद्धातुः सिसृक्षोरनुगतज
गतः कर्मभिः संप्रवृत्ताद्रेतोरूपैर्मनोभिः प्रथममनुगतैः संततैः कार्यमाणैः॥२५॥ टी०॥
अथ पूर्वमुक्तं तदानीं जगन्नासीदिति तर्हि पुनः कथमुत्पन्नमित्याशंक्याह। प्रागासीदिति। जगदुपादानभू
तं भावरूपं तम इत्यज्ञानमासीत्तेन तमसा गूढमाच्छादितं जगत् अस्मात्कारणादतर्क्यं अज्ञायमानं किंवत्।

(margin: पृथ; कं; भ्रं)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्वत् क्षीरान्तरगतं अंभउदकं क्षीरान्तर्वर्तमानमपि न ज्ञापयते तद्वत्। ततइहास्मिन्नज्ञाने अस्य नामरूपात्मकस्य जगतः जनिरुत्प-
त्तिः ननु यद्यपि बीजान्तर्गतो वृक्षस्तिष्ठति तथापि कारणसामग्रीव्यतिरेकेण नोत्पद्यते अतआह। कामादिति। सिसृक्षोः स्रष्टु-
मिच्छतो धातुः परमेश्वरस्य कामादिच्छातः सापि कुत इत्यत आह। किंभूताद्यतः कामादनुगतजगतः कर्मभिः संप्रवृत्तात्
अनुगतं अनादित्वेन वर्तमानं यज्जगत्तस्य कर्मभिः प्रेरितात् अथ तान्यपि कुत इत्याह। रेतोरूपैः बीजभूतैर्मनोभिः प्रथम-
मनादिप्रवाहेणानुगतैः सद्भिः कार्यमाणैः निष्पादितैः कर्मभिरित्यर्थः। एतदर्थे श्रुतिरपि। तमआसीत्तमसा गूढमग्रे
प्रकेतं सलिलं सर्वमाइदं। तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकं॥ कामस्तदग्रे समवर्तताधि मनसो रेतः
प्रथमं यदासीत्। सतो बंधुमसति निरविंदन् हृदि प्रतीष्या कवयो मनीषा। भाष्यं। ननुक्तप्रकारेण यदि पूर्वमिदं जगन्नासी-
त्कथं तर्हि तस्य जन्म जायमानस्य जनिक्रियायां कर्तव्यत्वेन कारकत्वात्कारकं च कारणावान्तरविशेष इति कारकस्य सतो निय-
मपूर्वक्षणवर्तित्वस्यावश्यंभावात्। अथैतद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते। कथं तस्य जन्म
अतआह। तमसा गूढमग्र इति। अग्रे सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत्तमसा गूढं यथा नैशं तमः सर्वपदा-
र्थजातमावृणोति तद्वदात्मतत्वस्यावरकत्वान्मायापरपर्यायं भावरूपाज्ञानं अत्र तम इत्युच्यते। तेन तमसा निगूढं संवृतं
कारणभूतेनाच्छादितं भवति। ननु कारणभूते तमसि तज्जगदात्मकं कार्यं विद्यते चेत्तर्हि कथं नासीदिदं इत्यादिना तन्निषेध-
स्तत्राह। तम आसीदिति। तमोभावरूपाज्ञानं मूलकारणं तद्रूपतां तदात्मतां यतः सर्वजगत्प्राप्तमासीदतो निषिध्यत इत्यर्थः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वाधारकत्वोदावरणं तमः कर्तृ आवार्यं जगत्कर्म कथं कर्तृकर्मणोस्तादात्म्यं तत्राह। अप्रकेतमिति। अप्रकेतं अप्रज्ञा
यमानं। अयमर्थः। यद्यपि जगतस्तमसः कर्मकर्तृभावो यौक्तिको विद्यते तथापि व्यवहारदशायामेतस्यां दशायां ना
मरूपाभ्यां विस्पष्टं न ज्ञायत इति तादात्म्यवर्णनं। अतएव मनुना स्मर्यते। आसीदिदं तमोभूतमप्रज्ञातमलक्षणं।
अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वत इति। कुतो वा न प्रज्ञायत इत्याह। सलिलमिति लुप्तोपमा सलिलमिव यथा क्षीरेणा
विभागापन्नं नीरं दुर्विज्ञानं यथा तमसा अविभागापन्नं जगत्। ननु विविधविचित्रभूयसः प्रपंचस्य कथमतितुच्छेन त
मसा क्षीरेण नीरस्याभिभवः। तथा तमोपि क्षीरवज्जलवदित्येवोच्यते। तर्हि दुर्बलस्य जगतः सर्गसमये नोद्भव इत्य
तआह। तुच्छेनेति। आसमंताद्भवतीत्यति तुच्छेन तुच्छकल्पेन सदसद्विलक्षणेन भावरूपाज्ञानेनापिहितं छादितमासी
त्। एकं एकीभूतं कारणेन तमसा अविभागतां प्राप्तमपि तत्कार्यजातं तमसः पर्यालोचनरूपं त्वन्यत्राम्नायते। यः स
र्वज्ञः सर्वविद्यस्य ज्ञानमयं तप इति। अथ कामस्तदग्र इति। ननूक्तरीत्या यदीश्वरस्य पर्यालोचनं जगतः पुनरुत्पत्तौ
कारणं तदेव वा किं निबंधनमित्यत आह। कामस्तदग्र इति। अग्रे यस्य विकारजातस्य सृष्टेः प्राग्स्थोयं परमेश्वरस्य म
नसि कामः समवर्तत सम्यगजायत सिसृक्षाजायतेत्यर्थः। ईश्वरस्य सिसृक्षा वा किं हेतुकेत्यत आह। मनस इति। म
नसोंतःकरणसंबंधिवासनाशेषेण मायायां विलीनेंतःकरणे समवेतसामान्यापेक्षमेकवचनं। सर्वप्राण्यंतःकरणेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समवेत इत्यर्थः। एतेनात्मनो गुणधारत्वं प्रत्याख्यातं। तादृशं रेतः। भाविनः प्रपंचस्य बीजभूतं प्रथमं अतीते कल्पे प्राणिभिः कृतं पुण्यापुण्यात्मकं कर्म यस्मात् कारणात् सृष्टिसमये आविर्भवेत्। भूष्णुर्वर्धिष्णु अजायत परिपक्वं सत् फलोन्मुखमासीदित्यर्थः। तत्तो हेतोः फलप्रदस्य सर्वसाक्षिणः कर्माध्यक्षस्य परमेश्वरस्य मनसि सिसृक्षा अजायतेत्यर्थः। तस्यां च जातायां स्रष्टव्यं पर्यालोच्यते ततः सर्वं जगत्सृजति। तथा चाम्नायते। सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदं सर्वमसृजत। यदिदं किंचेति। अथो विद्वदनुभवमपि अनुग्राहकत्वेन प्रमाणयति। सत इति। सतः सत्वेनेदानीमनुभूयमानस्य सर्वस्य जगतः बंधं बंधकत्वं हेतुभूतं कल्पांतरे प्राण्यनुष्ठितकर्मसमूहं कवयः क्रांतदर्शिनो योगिनः हृदि हृदये निरुद्धं अवस्थाप्य अधिकृत्य लब्ध्वा मनीषया बुध्या प्रतीष्य विचार्य असति सद्विलक्षणे अव्याकृते कारणे निरविंदन् निष्कृष्यालभंत विविच्य जानन् इत्यर्थः।

॥२५॥ श्लो०॥ चत्वारो स्याः कपर्दी युवति रथ भवेन्नूतना नित्यमेषा मायावापेशला स्यादघटनघटनापाटवं यातियस्मात्॥ स्यादारंभे घृतास्याः श्रुतिभव वयुनान्येव माच्छादयंतीतस्यामेतौ सुपर्णाविव परपुरुषौ स्तो ह्यतोऽर्थप्रतीत्या॥२६॥ टी०॥ मायया उत्कर्षं वर्णयति। चत्वार इति। अस्याः पूर्वोक्तमायायाः चत्वारः कपर्दा उत्कर्षाः संतीति अथ तानेवाह। युवतिरिति। एषा माया नित्यं नूतना। कदापि स्थविरा न भवति। अतो युवतिर्भवेत्। देहादिवार्धक्यस्यापि सा तरुण्येवास्ति। अयं चैक उत्कर्षः। तथेयं पेशला स्यात्। किं नाम पेशलत्वमाह। पेशला कुशलेत्यर्थः। तदेवाह। यस्मादिति। यस्मात्कारणादियं अघटनघटनापाटवं विक्षेपे एवं कौशलं याति। अयंद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीय उत्कर्षः। तथेयमारंभे उपक्रमे घृतास्या घृतवन्मिष्टमास्यं मुखं यस्याः सा तथा यस्य कस्यापि प्रारंभे मिष्टं दर्शय
ति। परिणामे विषोपममित्यर्थः। अयं तृतीय उत्कर्षः। अप्येवं श्रुतिभिर्वयुनानि श्रुतिरूपनिषद्वाग्भिः प्रतिपादितानि आत्मज्ञा भि
नानि आवरणशक्त्या आच्छादयति। अयं चतुर्थ उत्कर्षः। तस्यां चतुरुत्कर्षवत्यां मायायामेतौ परपुरुषौ एतौ जीवेश्वरौ सु
द पर्णौ पक्षिणाविव तिष्ठतः। अत्र श्रुतिः। चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते। तस्यां वृषणा निषेदतु
र्यत्र देवा दधिरे भागधेयमिति। केन प्रकारेण ज्ञातावित्यत आह। अर्थैति। अर्थप्रतीत्या पदार्थभासकत्वेन मायातिरो
धानकर्त्रीति कलभासकत्वं परमात्मन एवेत्यर्थः॥२६॥ श्लो०॥ एकस्तत्रात्यसंगस्तदनु तदपरोऽज्ञानसिंधुं प्र
विष्टो विस्मृत्यात्मस्वरूपं स विविधजगदाकारमाभासमैक्षत्॥ बुध्यान्तर्यावदैक्यं विसृजति तमजा सोपि
तामेवमेकस्तदृष्टिं प्राप्तस्तमेकं कथयति बहुधा कल्पयंति स्म वाग्भिः॥२७॥ टी०॥ इदानीं जीवपरमात्मनोः पर
मार्थतः। एकत्वमाह। एक इति। तत्र तयोः सुपर्णयोर्मध्ये एकः परमात्मा असंगोस्ति। तदनु तदपरो जीवः अज्ञा
नसिंधुं प्रविष्टः स आत्मस्वरूपं विस्मृत्य विविधजगदाकारं आभासं प्रातिभासिकं ऐक्षत दृष्टवान्। ततः बु
ध्या निश्चयात्मिकया अंतः यावदैक्यं तावदजा माया तं जीवं विसृजति सोपि जीवः तां मायां विसृजति। अंतर्दृ
ष्ट्या विचार्यमाणे उभयोरसंस्पर्शे अखंडत्वमेवानुभूयते। तर्हि सुपर्णद्वयकल्पना कुत इत्याह। विप्रा इति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमेकमेवात्मानं विप्राः श्रुतिज्ञाः कवयः शिष्यबोधादिव्यवहृतिविषये वाग्भिर्वचोभिरनेकधा कल्पयंति। न त्वनुभवत इत्यर्थः। एतदर्थे श्रुतिः। एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे। तं पाकेन मनसापश्यमंतितस्तं माता रेळ्हि स उ रेळ्हि मातरमिति ॥२७॥ श्लो०॥ नायाति प्रत्यगात्मा प्रजननसमये नैव यात्यंतकाले यत्सोऽखंडोऽस्ति लैंगं मन इह विशति प्रव्रजत्यूर्मवर्कि ॥ तत्काश्यं स्थूलतां वा नभजति वपुषः किंतु संस्कारजातैस्तेजोमात्रा गृहीत्वा व्रजति पुनरिहायाति तैस्तैः सहैव ॥२९॥ ध्र्व

टी०॥ अथ जन्ममरणानुबंधेनास्य स्वरूपत्वं निरूपयति। नायातीति। प्रजननसमये गर्भाविर्भावे सति प्रत्यगात्मा नायाति गर्भे न प्रविशति। तथांतकाले देहावसाने न याति न गच्छति। यद्यत आत्मा अखंडः अपरिच्छिन्नोऽस्ति। यतः प्रवेशनिर्गमौ हि परिच्छिन्नस्यैव भवतः तर्हि लोके जन्ममरणादिव्यवहारः कस्येत्याह। लैंगं पंचदशकलोपेतं मनः इहलोके वार्कि मनुष्यलोके वा गर्भे विशति तथा प्रव्रजति च न प्रत्यगात्मा। अथ तल्लिंगदेहोपेतं मनः वपुषः स्थूलदेहस्य कार्श्यं कृशतां पुष्टत्वं वा भजति। रोगाद्युपहतौ [illegible] कृशता तथा पाटवे पुष्टत्वं वा भजति। एवं तन्मन उत्क्रांतौ पूर्वसंस्कारजातैस्तथा तेजोमात्राः प्रत्यंग प्राणान् गृहीत्वा व्रजति गच्छति। तथा पुनरुत्पत्तिसमये तैस्तैः संस्कारजातैः सह इह गर्भे आयाति ॥२९॥ श्लो०॥

॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥आसीत्पूर्वं सुबंधोभिशमवनिसुरो यः पुरोधाः सनातेर्ब्राह्म्यात्कूटाभिचारात्स खलु मृति
मितस्तन्मनो गात्कृतांतं॥तद्भ्राता श्रौतमंत्रैः पुनरनयदिति प्राह सूक्तेन वेदस्तस्मादात्मा
भियुक्तं व्रजति न तु मनः कर्हिचिन्नांतरात्मा॥२९॥ टी०॥ अथ प्रवेशनिर्गमो मनस एव संभवतु ना
त्मन इत्यत्र ऋग्शाखीयां श्रुतिमाख्यायिकापूर्विकां संवादयति। आसीदिति। सुबंधुर्नामा अवनिसुरो
ब्राह्मणः पूर्वं अभिशमत्यर्थं सर्वोत्कर्षेणासीत् किंभूतः सनातेः पृथ्वीभुजः पुरोधा पुरोहितः। अथ खल्वि
ति श्रूयते। स ब्राह्म्यात् ब्राह्मणकृतात्कूटाभिचारात्कापट्यरचितादभिचारादस्य योगान्मृतिमितः म
रणं प्राप्तः तन्मनः कृतांतं यमलोकमगात्। अथ तस्य सुबंधोर्भ्राता श्रौतमंत्रैः कृत्वा नद्रतं मनः पुनरन
यत्। आनीतवानिति सूक्तेन वेदः प्राह। तस्मात्कारणादात्माभियुक्तं आत्मनि प्रतिबिंबाभियुक्तं सन्मन
एव व्रजति। परं त्वंतरात्मा न व्रजति। एतन्मूलभूता श्रुतिरपि अष्टमेष्टके। यत्ते यमं वैवस्वतं मनो जगाम
दूरकं। तत आवर्तयामसीह क्षयाय जीवसे। भाष्यं। अत्रेयमाख्यायिका। पूर्वं [illegible] सनातिसंज्ञस्यरा
ज्ञो गृहे बंधुः सुबंधुः श्रुतबंधुः विप्रबंधुरिति चत्वारो भ्रातरः पुरोहिता आसन् तेन द्विष्टनाशाय प्रेरि
ता राजा द्विष्टमाभिचारिकं न कुर्वंतीति राज्ञा बहिः कृताः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

ततोऽन्यन्मायाविपुरोहिद्वययुक्तं तेन बंध्वादयश्चत्वारः क्षुब्धाः संतो राज्ञे आभिचारिकं कर्तुं प्रवृत्तास्तच्छ्रुत्वा मायावि
नौ पुरोहितौ चाभिचारिक कर्मणा सुबंधुं जघ्नतुः। ततः सुबंधोर्भ्रातरः तं पुनर्जीवितुं वक्ष्यमाणैः श्रौतमंत्रैरु
पायं चक्रुः। यत्ते यममिति भाष्यं। भो सुबंधो यत्ते मनः वैवस्वतं विवस्वतः सूर्यस्य पुत्रं यमं प्रति दूरं जगाम। यत्तेम
नः आवर्तयामसि निवर्तयामः किमर्थं इह लोके क्षयाय निवासाय जीवसे जीवनायेति प्रथमा। अथ द्वितीया।
यत्ते दिवं यत्पृथिवीं मन्नूतपा। यमादहं वैवस्वतात्सुबंधोर्मन आभरं। जीयातवेन मृत्यवे थो अरिष्टतातये॥२९॥

म

श्लो०॥ एको निष्कंप आत्मा प्रचलति मनसा धावमानेन तस्मिं स्तिष्ठन्नग्रे थ पश्चान्न हि तमनुग
तं जानते चक्षुराद्याः॥ यद्वत्पाथस्तरंगैः प्रचलति परितो धावमानैस्तदंतः प्राक् पश्चादस्ति
तेषां पवनसमुदितैस्तैः प्रशांतैर्यथावत्॥३०॥ टी०॥ इदानीं चलनादिधर्माः मनस एव नात्मन इ
ति दर्शयति। एको द्वितीयो निष्कंपः कर्मशून्य आत्मा धावमानेन मनसा सह चलति तथा तस्मिन्मनस्य
पि तिष्ठन्सन् अग्रे पुरतः पश्चाच्च वर्तते। तमेवंविधमात्मानं अनुगतमंतर्गतमपि चक्षुराद्या न जान
तेन जानंति। इंद्रियागोचरत्वात्। तत्र दृष्टांतमाह। यद्वदिति। यद्वत्पाथः उदकं परितो धावमानैस्तरंगैः
प्रचलति। तथा तेषां तरंगाणां अंतः प्राक् पश्चाच्च पाथोऽस्ति। किंभूतैस्तरंगैः पवनसमुदितैर्वायुनोत्प
न्नैः एवं मायामयैरिंद्रियैरप्यात्मा अथ तैः प्रशांतैः सद्भिर्यथावत्प्रतिसंध पाथ एवास्ति तद्वदात्मापि॥३०॥

रू

॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति

॥श्लो०॥ एकाक्यासीत्स पूर्वं मृगयँ विषयाननुपूर्व्यांतरात्मा जाया मे स्यात्प्रजा वा धनमुत्सुकः करं
कर्म कुर्वीस्तदर्थं॥ क्लेशैः प्राणावशेषैर्महदपि मनुते नान्यदस्माद्वरीयस्त्वेकालाभेप्यकृत्स्नो
मृत इव विरमत्येकहान्याकृतार्थः॥३१॥ टी०॥ इदानीं जीवस्य बाह्यप्रपंचानुवृत्तिं निरूपयति। एकाकीति।
सोंतरात्मा पूर्वं एकाकी आसीत् अतः पूर्वं अनुपूर्व्या अनुक्रमेण विषयान्मृगयति गवेषयति। अथानुपूर्वीमाह॥
प्रथमं जाया मे स्यात् ततस्तन्निर्वाहार्थं धनं वित्तं मे स्यात्। अथ तदर्थं वित्तप्राप्त्यर्थं प्राणावशेषैः क्लेशैः कर्म कुर्व
न् एवं धनादिविषयप्राप्तो अस्माद्विषयादन्यन्महद्वरीयं श्रेष्ठं न मनुते। एवं बहुविषयोद्देशे सति एकविषयाला
भे सति अकृत्स्नो भूत्वा मृत इव विरमति विरामं प्राप्नोति। तथा एकहान्या प्राप्तस्य नाशेनाकृतार्थो भवति।
अत्र मूलश्रुतिः। आत्मैवेदमग्र आसीदेक एव सोकामयत जाया मे स्यादथ प्रजायेयाथा वित्तं मे स्यादथ कर्म
कुर्वीयेत्येतावान्वैकामो नेत्सच्चनातो भूयो विंदेत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं
मे स्यादथ कर्म कुर्वीयेति। तेषामेकैकं न प्राप्नोत्यकृत्स्न इव तावन्मन्यते तत्स्यादकृत्स्नता। भाष्यं। अग्रे पू
र्वं इदं मयं एक एव केवलमात्मैवासीत्स जाया मे स्यादित्यकामयत ऐच्छत्। ततोस्यां जायायां प्रजायेय पुत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वेन जन्म प्राप्नुयामित्यकामयत। अस्यां जायते पुनरिति श्रुतिः। तथा आत्मैव जाया पुत्रत्वेन परिणमति। त
थायत्कर्म करोति तदर्थमेवेति पुनः श्रुत्या निरूपयिष्ये। एवं जायापुत्रप्राप्तौ तद्भरणार्थं वित्तं मे स्यादिति
कामयते। अथ वित्तप्राप्त्यर्थं कर्म कुर्वीयेति। एतावान्वै कामः। अथ नेदिति निषेधार्थं नेत्सत् न संभवतीत्यर्थः।
अथ जायापुत्रादिविषयादन्यद्भूयः बहुतरं न विंदेत् विंदति। एवं यावज्जीवं पुनरुत्पत्तिमासाद्य तथै
वेति पुनरुक्तं। एवं स जीवः यावदेतेषां जायादीनां मध्ये एकं न प्राप्नोति तावदकृत्स्नः असंपूर्णो हमिति
मन्यते। इत्येवं तस्याकृत्स्नता असंपूर्णता॥२१॥ श्लो०॥ नासीत्पूर्वं न पश्चादतनु दिनकराच्छा
दको वारिवाहो दृश्यः किं त्वंतरा सौ स्थगयति सदृशं पश्यतो नार्कबिंबं॥ नो चेदेवं विनार्कं ज
लधरपटलं भासते तर्हि कस्मात्तद्वद्विश्वं पिधत्ते दृशमथ न परं भासकं चालकं स्वं॥२२॥
टी०॥ अविद्याया आवरणशक्तिमेव विविच्य प्रपंचयति। नासीदिति। वारि वहतीति वारिवाहो मेघः। अतनु
र्महान् लोकत्रयप्रकाशको यो दिनकरः दिवसे प्रसृतकरः सूर्यस्त
दिनकराच्छादको भवति। न तनुरतनुर्महान् लोकत्रयप्रकाशको यो दिनकरः दिवसे प्रसृतकरः सूर्यस्त
दाच्छादको भवति। अथ तस्याच्छादकत्वं अंतरालिकं न प्रवाहपरंपरागतमित्याह। नासीदिति। मेघः प्रा

वृष्टिकालात्पूर्वं ग्रीष्मे नासीत्। अथ पश्चाच्छरत्कालेऽपि नासीत्। एवमेवंविधो मेघः सूर्यं पश्यतो जनस्य दृशमेव स्थगयति। आवृणोति। नार्कबिंबं तस्यामेघाद्यभितः करप्रसारशालित्वादित्यर्थः। एवं सत्यपि सूर्येऽलोको निःप्रभोऽर्कं विना जलधरपटलं कस्माद्भासते सूर्यस्य घनपटलेन तिरोहितत्वात् घनपटलं कस्मात्प्रकाशांतरात्त्रायते। सूर्यस्याच्छन्नत्वेन प्रकाशकस्यानर्हत्वादित्यर्थः। तथा च सूर्यं पश्यतो जनस्य घनपटलेन दृष्टिरेवावृता न सूर्यः। एतत् दृष्टांतावष्टंभेन भूमंडलस्यापि सूर्यावरकत्वं तद्वदेवेत्यर्थः। अथ यद्यर्थमेतदुपक्रांतं तदाह। तद्वदिति। तद्वदंतरोत्पन्नं विश्वमपि पश्यतो दृशं दृष्टिमेव पिधत्ते। न परं परं ब्रह्मस्वरूपं स्वभासकं चालकं च। स्वशनाच्छादयति। तर्हि कथं न दृश्यत इत्याशंक्य दृश्यत एवेत्याह। किंभूतं परं ब्रह्म स्वभासकं चालकं च। येन विचित्ररूपं विश्वमाभाति तथा येन चलति सर्वव्यवहारं करोति तत्परं ब्रह्म द्वैन विश्वं तस्य भासकं चालकं च। येन विचित्ररूपं विश्वमाभाति तथा येन चलति सर्वव्यवहारं करोति तत्परं ब्रह्म अधिष्ठानं विना भासकचालकांतराभावात्। तथा च जगदादिमध्यावसाने षु वर्तमानं ब्रह्मैव सत्यं। तदज्ञानादुदितो जगदाकारः शुक्तिरजतवत्प्रातिभासिक इत्यर्थः॥३२॥ श्लो०॥ अज्ञानः स्वप्ने राज्यं ससकलविभवो जागरं प्राप्य भूयो राज्यभ्रष्टोऽहमित्थं न भजति विषमं तन्मृषा मन्यमानः॥ स्वप्ने कुर्वन्नगम्यागमनमुखमघं तेन न प्रत्यवायी तद्वज्जाग्रद्दशायां व्यवहृतिमखिलां स्वप्नवद्विस्मरेच्चेत्॥३३॥

ब्रह्म

कारा

32

॥टी०॥ एवं स्वप्नदृष्टांतेन प्रपंचस्य मिथ्यात्वं निरूपयति। भुंजान इति। स सकलविभवः सेनाकोशाद्युपस्कारयुक्तः सन् स्वप्न
राज्यं भुंजानः पुरुषः भूयो जागरं प्राप्य प्राक्तनं दरिद्ररंकदेहं निरीक्ष्य अहं राज्यभ्रष्ट इति विषमं शोकं न भवति। कुतस्त
त्स्वप्न राज्यं मृषा मन्यमानः। अथेममेवार्थं दृष्टांतेन द्रढयति। स्वप्ने अगम्यागमनस्तेयसुरापानब्रह्मवधादि
अघं पातकं कुर्वन् ततः प्रबोधं प्राप्तः सन् तेन पातकेन प्रत्यवायी प्रायश्चित्ती न भवति। तथा पूर्वश्लोके व्य वहारार्थ एवद
श्यते। मनसाप्यनुतापं न प्राप्नोति। कुतः तन्मृषा मन्यमान इति पूर्ववत्। तथा जाग्रद्दशायामेव पापकर्ता प्रायश्चित्ताहीं भव
ति। अथ जाग्रद्दशायामपि अखिलं पुण्यपापव्यवहृतिं चेत्स्वप्नवद्धि स्मरेत् तथापि तद्प्रायश्चित्ताहीं न भवति। यतस्त-
न्मृषा मन्यमानः प्रागुक्तमेव। तदुक्तं भगवता। ब्रह्मण्याधाय कर्माणीत्यादिना॥३३॥ श्लो०॥ स्वप्नावस्थानुभूतं
शुभमथ विषमं तन्मृषा जागरे स्याज्जाग्रत्स्थूलदेहव्यवहृतिविषयं तन्मृषा स्वापकाले॥ इत्थं मिथ्या
त्वसिद्धावनिशमुभयथा सज्जते तत्र मूढः सत्ये तद्भासके स्मिन्निह हि कुत इदं तन्न विद्मो वयं हि॥३४॥
॥टी०॥ अथ जाग्रत्स्वप्नयोरपि भ्रमजनकत्वमस्तीत्याह। स्वप्नावस्थायामनुभूतं शुभं राज्यभोगेष्टप्राप्त्यादि। तथा विषमं व्या
घ्रभक्षणादि तत्सर्वं जागरे मृषा भवति। अथ जाग्रद्दशायां स्थूलदेहव्यवहृतिविषयं शुभं मिष्टाशनादिसकलभोगसुखं।
।तथा विषमं। आधिव्याधियातनाजनितं दुःखं यत्स्वापकाले सर्वं मृषा भवति। इत्थममुना प्रकारेणोभयथापि अनि
शं निरंतरं मिथ्यात्वसिद्धौ सत्यां तत्र मूढो यः सज्जते अभिनिवेशं करोति। तत्कस्मात्कारणादिति वयं न विद्मः॥३४॥

पा

र

१७

३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्लो०॥ जीवंतं जाग्रतीह स्वजनमथ मृतं स्वप्नकाले निरीक्ष्य निर्वेदं यात्यकस्मान्मृतममृतमनुवीक्ष्य
हर्षं प्रयाति॥ स्मृत्वाप्येतस्य जंतोर्निधनमसकृद्युक्तं भाषते तेन साकं सत्यं भाति भूयोऽल्पकसमयवशात्सत्य
ता वा मृषात्वं॥३५॥ टी०॥ अथैतदेव सोदाहरणं निरूपयति। जीवंतमिति। इहलोके जाग्रत्येवस्थायां जीवंतं स्वजनं।
अथेदानीं स्वप्नकाले मृतं निरीक्ष्याकस्मान्निर्वेदं दुःखं याति प्राप्नोति। अथवा जाग्रत्यां मृतं विपन्नं स्वजनं स्वप्नकाले मृतं
जीवंतं वीक्ष्य हर्षं प्रयाति। अनेन जाग्रत्यनुभूतं स्वप्नकाले मृषा भवतीति दर्शितं। अथ तत्र तत्तद्स्मरणे नान्यथा प्रतीय
त इति चेत्तत्राह। स्मृत्वेति। एतस्य जाग्रत्यां मृतस्य जंतोर्निधनं स्मृत्वापि अथवा जीवंतं असकृद्युक्तं जीवनं स्मृत्वापि तेन
सह भाषते वार्ताः कथयति। तथा मृतेन सह दीनालापं करोति। तथा च स्वप्नकालेपि स्मरणवतोपि मृषात्वप्रतीतिर्भवतीति
सूचितं। एवं सत्यमयथा मिथ्याभूतो सत्यां अपि स्वप्नमृषात्वप्रतीतिर्जाग्रत्यां च सत्यत्वप्रतीतिर्लौकिकानां कथमुत्पद्यत इ
त्यत आह। भूयोऽल्पकसमयवशात्सत्यता मृषात्वं चाभाति भासते न तात्त्विकं। भूयांश्चाल्पकश्च तौ च तौ समयौ च तद्दशात् जा

तआ
से

ग्रति स्थिरकालमस्ति तत्र दृढानुसंधानात्सत्यत्वं भासते। स्वप्नस्त्वल्पसमयदृश्योऽस्त्यतस्तत्र मृषात्वं भासते विचार्यमाणे
तावदुभयोरपि असत्त्वमित्यर्थः॥३५॥ श्लो०॥ स्वाप्नस्त्रीसंगसौख्यादपि भृशमसतो यावद्रेतश्च्युतिः स्या
त्सादृश्यात् हृद्येतत्स्फुरति जगदसत्कारणं सत्यकल्पं॥ स्वप्ने सत्यः पुमान् स्याद्भवति रिह मृषा वानयोः सं
युक्तिश्च प्रातः शुक्रेण वस्त्रोपहतिरिति यतः कल्पनामूलमेतत्॥३६॥ टी०॥ इदानीमसद्रूपोपादानकं विश्वम
पि सदिति दृष्टान्तमाह। स्वप्न इति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असतः अविद्यमानादपि स्वाप्नस्त्रीसंगसौख्याद्रेतश्च्युतिः शुक्रद्रावो भवति। सादृश्यव्यवहारिकसत्याभवे तद्वदसत्कारणं जगत्सत्यकल्पं स्फुरति। नामैकदेशे नामग्रहणमितिवत्। असत्सदसद्विलक्षणमविद्याख्यकारणं यस्य तदसत्कारणं। एवंविधं जगत्सत्यकल्पं स्फुरति। न तु सत्यं। स्वप्नसावस्तमितत्वात्। अथ दृष्टांते दार्ष्टांतिकसिद्धिमाह। स्वप्न इति। स्वप्ने पुमान्सदृशः युवती स्त्री मृषा। च परं अनयोः स्त्रीपुरुषयोः संयुतिः रतसुखमपि मृषा। तथापि तज्जाग्रदवस्थायां शुक्रेण रेतसा व स्त्रोपहतिः प्रत्यक्षसिद्धा। एवमात्मा सत्यः स्त्रीमायाऽसत्या। तयोर्युतिः संबंधः आध्यासिकः अत एव मृषा तस्माज्जातं जगद्व्यवहारसत्यं। यतः सर्वत्र कल्पनामूलं काल्पनिकमित्यर्थः॥३६॥ श्लो०॥ पश्यंत्यात्मारामस्य प्रतिदिवसममी जंतवः स्वाप्नकाले पश्यत्येनं न कश्चित्करणगणमृते मायया क्रीडमानं॥ जाग्रत्यर्थप्रजानामथ च तनुभृतां भासकं चालकं वा नो जानीते सुषुप्तौ परमसुखमयं कश्चिदाश्चर्यमेतत्॥३७॥ टी०॥ अथावस्थात्रयेपि अनुभूयमानमात्मानं केपि न चिन्वंतीत्याश्चर्यमाह। पश्यंतीति। अमी जंतवो जीवाः प्रतिदिवसं स्वप्नकाले अस्य परमात्मनः आरामं क्रीडां पश्यंति। परं त्वेनं कश्चिन्न पश्यति। किंभूतमात्मानं। करणगणमृते बाह्येंद्रियव्यतिरेकेणापि मायया स्वाप्नदेहेंद्रियादिरूपया क्रीडमानः। अथास्तां तावन्मौढ्यदृशा स्वप्नावस्थायां जाग्रत्यामपि तनुभृतां चालकं तथार्थप्रजानां भासकं प्रकाशकं निरंतरं पश्यंति। न तथा सुषुप्तौ परमसुखमयं एवंविधं परमात्मानं केपि न जानंतीत्येतन्महदाश्चर्यमित्यर्थः॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्लो०॥ स्वाप्नो मंत्रोपदेशः श्रवणपरिचितः सत्य एष प्रबोधे स्वाप्नाद्देवप्रसादादभिलषितफलं सत्यतां प्रातरेति ॥ सत्यप्राप्तिस्त्वसत्यादपि भवति तथा किंच तत्त्वप्रकाशं येनेदं भाति सर्वं चरमचरमथो ह्यावचं दृश्यजालं ॥२८॥ टी०॥ ननु जाग्रदवस्थायामपि स्वप्नदर्शनेन मृषात्वे प्रोच्यमाने तस्यां गुरुमुखादुपनिषद्विचारादिना यो ब्रह्मबोधः सोऽपि मृषा भवति ततो ब्रह्मापि वंध्यापुत्रवदसद्रूपं स्यादित्याशंक्याह। स्वाप्न इति ॥२८॥ श्लो०॥ मध्यप्राणं स्रुषुप्तौ स्वजनिमनुविशंत्यग्निसूर्यादयोऽमी वागाद्याः प्राणवायुं तदिह निगदिता ग्लानिरेषां न वायोः ॥ तेभ्यो दृश्यावभासोऽभ्रमइति विदितः शुक्तिकारौप्यकल्पं प्राणायामव्रतं तच्छ्रुतिशिरसि मतं स्वात्मतत्त्वावबोधे चनान्यत् ॥२९॥ टी०॥ एवं स्वप्नदर्शनेन जगन्मिथ्यात्वं निरूप्येदानीं जगत्सत्यत्वाभिव्यंजकायां जाग्रत्यामपि तन्मिथ्यात्वं निरूपयति। मध्यप्राणमिति। अमी अग्निसूर्यादयः वागादींद्रियाधिदेवताः स्रुषुप्तौ तृतीयावस्थायां मध्यमं प्राणं विराजमनुविशंति। किंभूतं विराजं स्वजनिं। स्वस्य जनिर्जन्म यस्मिन्सतथा स्वस्योत्पादकं। मुखादिंद्रश्चाग्निश्चेति। तथा। चक्षोः सूर्यो अजायतेति श्रुतेः। कार्यजातस्य कारणे प्रवेशो युक्त एवेत्यर्थः। तथा वागाद्या इंद्रियगणाः स्रुषुप्तौ प्राणवायुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रसंज्ञं अनुविशंति। ततस्मात्कारणादेषां साधिदेवतानामिंद्रियाणां ग्लानिरस्तमयः निगदिताउ
पनिषत्प्रतिपादिता परंतु स्थूलसूक्ष्मप्रपंचलयरूपायां सुषुप्तावपि प्राणवायोरस्तमयो नास्ति। ततः सुषु
प्तौ श्वासरूपेण प्रत्यक्षत उपलभ्यमानत्वात्। अथ जागृत्यामपि चक्षुरादिभ्यो यो दृश्यावभासः दृश्या
नां रूपरसादीनां प्रतिभासः संभ्रमः न तात्त्विक इति विदितः। अथ भ्रमे दृष्टांत माह। शुक्तिकारौप्यक
त्स्य इति। तथा शुक्तावच्छिन्ने धिकरणे रौप्यं प्रातिभासिकं प्रतीयते। तद्वद्ब्रह्मण्यधिकरणे नामरूपात्म
कं विश्वं प्रातिभासिकं। तस्मात्कारणादवस्थात्रयेपि अनस्तमितं प्राणायामव्रतं स्वात्मलब्धौ श्रुतिशिर
सि मतं। नान्यच्चक्षुरादिव्रतं। तस्यावस्थात्रयेपि आत्मलब्धावकाशत्वात्॥ ३९॥ श्लो०॥ नोकस्मा
दार्द्रमेधः स्पृशति दहनः किंतु शुष्कं निदाघादार्द्रं चेतो नुबंधैः कृतसुकृतमपि स्वोक्तकर्म प्रजार्थैः॥
च तद्वत्तज्ज्ञानाग्निरेतत्स्पृशति न सहसा किंतु वैराग्यशुष्कं तस्माच्छुद्धो विरागः प्रथममभिहितस्ते
न विज्ञानसिद्धिः॥ ४०॥ टी०॥ अथ तयोर्वैराग्ययोगेनैव ज्ञानसिद्धिरित्यनुवदति। नोकस्मादिति। आर्द्रं जल
क्तमेधः काष्ठं दहनः कस्मान्न स्पृशति। निदाघात् शुष्कमेव स्पृशति। तद्वदनुबंधैः भार्यादिविषयैः आर्द्रं चे
तः स्वोक्तकर्म प्रजार्थैः कृतसुकृतमपि ज्ञानाग्निर्न स्पृशति। स्वोक्तकर्म स्वाश्रमवर्णोचितं प्रजापुत्र
॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रेणैव जयो नान्येन कर्मणेति। तथा नापुत्रस्य लोको स्तीति श्रुतिः। तथा अर्थैः अर्थसाध्यैः यज्ञदा
नादिभिः कृतस्कृतमपीत्यर्थः। किंतु वैराग्यशुष्कमेव चेतः ज्ञानाग्निः स्पृशति। तस्मात्कारणा
त् शुद्धो विरागः वांतत्यक्तान्नवद्विषयेषु वितृष्णता प्रथममावश्यकत्वेनाभिहितः प्रोक्तः। अत्र श्रु
तिः। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राज
ते तद्यतयो विशंति। भाष्यं। एके न त्यागेनैव वैराग्येण यतयः अमृतत्वमानशुः प्राप्ताः। परं तु न
कर्मणा फलापेक्षेण। न प्रजया पुत्रेण। धनेन दानादिना। अथामृतत्वं निरूपयति। परेणेति। परे
ण परब्रह्मणा नाकं स्वाशीभूतं गुहायां हृदाकाशे यन्निहितनिधिवद्गोपितं वस्तु यथार्थप्रकाशक
त्वेन भ्राजते स्पृशति। तदमृतं यतयो विशंति वैराग्यज्ञानगर्भमिति यश्चेत्पठति॥४०॥ श्लो०॥
यत्किंचिन्नामरूपात्मकमिदमसदेवोदितं भाति भूमौ येनानेकप्रकारैर्व्यवहरति जग
द्येन तेनेश्वरेण॥ तद्दत्प्रच्छादनीयं निभृतरशनया यद्वदेवद्विजिह्वस्तेन त्यक्तेन भोज्यं
स्वं स्वमनतिशयं मा गृधोऽन्य धनाद्यं॥४१॥ टी०॥ अथ प्रागुक्तोपदेशक्रमेण ईशावास्योप
निषदुक्तां श्रुतिं संवादयन्नाह॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्किंचिदसद्देवोदितं नामरूपात्मकं इदं शुक्तिकारजतवत् । इदमित्यस्य भावः । इदंत्वं इदंत्वेन भूमौ येनाभा
सते तथा गच्छतीति जगद्येन कृत्वा अनेकप्रकारैर्व्यवहरति तेनेश्वरेणेदं तद्वदाच्छादनीयं आच्छादनीयं तद्वत्
किंवत् । यद्वन्निभृतरशनया निश्चयेन ज्ञातया रज्वा ए..प्रातिभासिकत्वेन ज्ञातो द्विजिह्वः सर्प आच्छाद
यते । तद्वज्जगद्भासकत्वेन चालकत्वेन च संवित् चिद्रूपत्वनिश्चितेन परमात्मना जगदाच्छादनीयं तेन जगदाभा
सेन त्यक्तेन दूरतोपास्तेन केवलाभावे प्राप्ते अनतिशयमत्युत्कृष्टमात्यंतिकं सुखं भोज्यं । परंतु अन्यतद्धि
सेन त्यक्तेन दूरतोपास्ते न केवलाभावे प्राप्ते ... मा गृधः माभिकांक्षयेत्युपदेशत्रयं । श्रुतिः श्च । ईशावास्यमिति । भाष्य । इदं
लक्षणं धनादिकं विषयसुखं मा गृधः माभिकांक्षयेत्युपदेशत्रयं । श्रुतिः श्च । ईशावास्यमिति । भाष्य । इदं
लक्षणं धनादिकं विषयसुखं सर्वमाब्रह्मस्तंबपर्यंतं गच्छतीति जग..त्व्यवहारवत् जगत्यां पृथिव्यां
पुरोभासमानं यत्किंचिन्नामरूपात्मकं सर्वमाब्रह्मस्तंबपर्यंतं ... आच्छादने । आच्छादनीयं । जगद्भा
यद्भातितत् इष्टे इति इट् तेन ईशा सर्वोत्कृष्टेन परमात्मनाकृत्वा वास्यं वसआच्छादने । आच्छादनीयं । जगद्भा
यद्भातितत् इष्टे इति इट् तेन ईशा सर्वोत्कृष्टेन परमात्मना जगदाच्छाद्यं तुच्छत्वेन ज्ञेयं । एवं तेन जगदाभासेन त्यक्तेन दूरतोपा
सकत्वेन च ज्ञातेन परब्रह्मणा प्रतिभासकं जगदाच्छाद्यं तुच्छत्वेन ज्ञेयं । एवं तेन जगदाभासेन त्यक्तेन दूरतोपा
सकत्वेन च ज्ञातेन परब्रह्मणा प्रतिभासकं जगदाच्छाद्यं ... भुंजीथाः परंतु धनं विषयसुखं मा गृधः गृध अभिकांक्षायां । इदं कस्य
स्ते नावशिष्टमात्मस्वरूपमानंदात्मकं भुंजीथाः परंतु धनं विषयसुखं मा गृधः गृध अभिकांक्षायां । इदं कस्य
स्विन्नावशिष्टमात्मस्वरूपमानंदात्मकं भुंजीथाः ... नाहं गृहेशः त्यानिर्मोक्तत इव पठनीयं ॥ ४९ ॥ अथ स्त्रोको गतः ।
स्वित् किमुपादानमिति ज्ञात्वा माभिकांक्ष..यतिष्ठ । नाहं गृहेशः त्यानिर्मोक्तत इव पठनीयं ॥ ४९ ॥ अथ स्त्रोको गतः ।
स्वित् किमुपादानमिति ज्ञात्वा माभिकांक्ष..यतिष्ठ ।

शइति

॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्लो०॥ सर्वान्तुल्पमूल्यकामान् हृदि कृतनिलयान् क्षिप्रशंकून्विबोध्यौ दीर्घदेहाभिमानं त्यजति
चपलतामात्मदत्तावधानः॥ यात्यूर्ध्वस्थानमुच्चैः कृतसुकृतभरो नाडिकाभिर्विचित्रं नील
श्वेतारुणाभिः स्रवदमृतभरं गृह्यमाणात्मसौख्यः॥४३॥ टी०॥ अथ प्रथमो द्विशं जीवन्मुक्तिमा
ह। सर्वानिति। हृदि कृतनिलयान् अनेककल्पपर्यंतं संस्काररूपेण हृदि स्थितान्सर्वान्कामान्मनोरथान् तुल्पमू
ल्य उत्खातान् [illegible] त्वा दीर्घ देहाभिमानं त्यक्तः सन् चपलतां त्यजति। अहंममताभिमानमुत्सृज्य मनोवेगं
त्यजति। किंभूतः आत्मदत्तावधानः आत्मनि दत्तमवधानं अवि रतानुसंधानं येन स तथा। एवं तथाभू
तः सन् उच्चैरूर्ध्वस्थानं सर्वोत्कृष्टं ब्रह्मरंध्रं सुषुम्नाविवरेण याति। किंभूतं स्थानं। नीलश्वेतारुणा
भिर्नाडीभिर्विचित्रं सहस्रदलं चक्रं पुनः किंभूतं स्रवदमृतभरं कुंडलिनीमुखनिर्भेदेनामृतं स्रवती
त्यर्थः। किंभूतो जीवन्मुक्तः कृतसुकृतभरः कृतानेकपुण्यपुंजः पुनः किंभूतः गृह्यमाणात्मसौख्यः
ब्रह्मानंदवानस्मीति किंचिदुर्वरिताहंकारशेष इत्यर्थः। अत्र श्रुतिः। कं डिकाचतुष्टयं। यदा सर्वे प्रमुच्यंते का
माये स्य हृदि स्थिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति॥१॥ तद्यथाहिनिर्ल्वयनी वल्मीके मृ
ता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेथायमनस्थिकोशरीरः प्राज्ञ आत्मा ब्रह्मैव लोकं एवं सम्राडिति होवाच या
ज्ञवल्क्यः॥२॥

रू

॥२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदप्येते श्लोका अणुः पंथा विवरो मा ऽ स्पृष्टोनुवित्तो मयैव। तेन धीरा अपियंति ब्रह्मविद उत्क्रम्य स्वर्गं लोकमितो
विमुक्ताः॥३॥ तस्मिन् शुक्लमुत नीलमाहुः पिंगलं हरितं लोहितं च एष पंथा ब्रह्मणा हानुवित्तस्तेनैति ब्रह्म
वित्तैजसः पुण्यकृच्च॥४॥ भाष्यं। अस्य मुमुक्षोः पुरुषस्य हृदि स्थिताः सर्वे कामाः संकल्पाः यदा प्रमुच्यंते शां
ता भवंति। अथेत्यनंतरं तदानीमित्यर्थः। मर्त्यो मरणधर्मकोपि अमृतो मुक्तो भवति। किं पुनर्देवादिः। अथाम
तत्वमेवाह। अत्रेति। अत्रास्मिन्देहे वर्तमान एव ब्रह्म समश्नुते परमानंदमनुभवति। अथ शरीरे वर्तमानः स
न् तदभिमानशून्य इति सदृष्टांतमाह। तद्यथेति। अहेः सर्पस्य निल्वयनी निर्मोकः कंचुकं मृता निर्जीवा व
ल्मीके सर्पस्थाने प्रत्यस्ता प्रक्षिप्ता सती शयीत निश्चेष्टतया स्थिता सा दूरात्सर्प इव दृश्यते परंतु सर्पकृत्यं न क
रोति। एवं तद्वदिदं। अयं पुरुषः शरीरमिवाधिष्ठाय शेते निश्चेष्टतया वर्तिष्ठते। अथेत्यनंतरं अयं प्राज्ञः आत्मा
जीवः अनस्थिकः अस्थिरूपं स्थूलदेहं तदभिमानशून्यः। तथा अशरीरः शरीरं सूक्ष्मशरीरं तदभिमानशू
न्यश्च। भो सम्राडिति संबुध्या याज्ञवल्क्यो जनकं प्रत्युवाच। तदप्येते श्लोका इति। तत्रार्थे श्लोकाः। प्रसिद्धमं
त्राः संति तानेव याज्ञवल्क्य आह। अणुरिति। अणुः सूक्ष्मो मार्गः सुषुम्णा विवरोपलक्षितः विवरो विशिष्ट
तरः श्रेष्ठतमः एवंविधो मार्गो मां स्पृष्टः ममगुरुमुखाच्छ्रवणात्प्राप्तो जातः अनंतरं मयैव अनुवित्तः अनुष्ठि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मरंध्राख्यं स्थानं यांति प्राप्नुवं
तः तेन मार्गेण धीराः ब्रह्मविदः पुरुषा अपि इतः प्रपंचादि मुक्ताः संतः स्वर्गलोकं
ति। तस्मिन्विचित्रवर्णा नाड्यः संतीत्याह। शुक्लमि[illegible]त्यादि। एवमध्यात्मरीत्या व्याख्यातं। केऽपि आधिदैविकस्थि
त्या विश्वादिलोकप्राप्तिं व्याकुर्वंति। एवमेष पंथा मार्गः ब्रह्मणा मतः पूर्वं अनुवित्तः अनुष्ठितः तेनैव मार्गेण ब्रह्म

वि तैजसः वैराजत्वं प्राप्तः पुण्यकृदेति नान्य इत्यर्थः॥४३॥ श्लो०॥ प्रापश्य विश्वमात्मेत्यय मिह पुरुषः शोक
मोहाद्यतीतः शुक्लं ब्रह्मा[illegible]ध्यगच्छत्स खलु सकलवित्सर्वसिध्यास्पदं हि॥ विस्मृत्य स्थूलसूक्ष्मप्र
भृति वपुरसौ सर्वसंकल्पशून्यो जीवन्मुक्तस्तुरीयं पदमधिगतवान्पुण्यपापैर्विहीनः॥४४॥ टी०॥
अस्मिन्नर्थे ईश्यावास्योपनिषदुक्तां श्रुतिं संवादयति। अयं पुरुष इह अस्मिन्देहे वर्तमानः सन् विश्वमात्मेति प्रा
पश्यत्। पश्यति स्म। विश्वं विश्वाकारेण नापश्यत्। किं त्वात्माकारेणैव। किंभूतः शोकमोहाद्यतीतः एवं वि
धः सन् शुक्लं शबलं ब्रह्म हिरण्यगर्भाख्यं अध्यगच्छत्। अधिगतवान्। एवं हिरण्यगर्भत्वं प्राप्तः सकलवित्
सर्वज्ञो जातः। तथा सर्वसि[illegible]द्धीनामणिमाद्यास्पदं स्थानं च जातः। तथा असौ पुरुषः स्थूलसूक्ष्मप्रभृति वपु
विस्मृत्य सर्वसंकल्पहीनः सन् तुरीयं पदं अधिगवान्। आत्मसुखमनुभवति स्म। ततः पुण्यपापैर्विहीनः सक
लकर्मातीतः। अत्र श्रुतिः सार्धकंडिका। यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः। अत्र को मोहः कः शोक
एकत्वमनुपश्यतः।

(margin: श्वे॰ / शै॰ / शुन्ये॰)

॥२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं। भाष्यं। यस्मिन्काले विजानतो ज्ञानवतः पुरुषस्य सर्वभूतानि आत्मैवाभूत् सकलं ब्रह्मैवाभूत् तत्र तस्मिन्काले मोहः किमज्ञानं तथा तन्मूलः शोकः कः न कोपीत्यर्थः। किंभूतस्य विज्ञानवतः एकत्वमभेदं अनुपश्यतः। सर्वत्रैकत्वभावेनैव विज्ञानं स्वरूपमित्यर्थः। एवं स जीवन्मुक्तः शुक्रं सबलं शबलं
हिरण्यगर्भस्वरूपं पर्यगात् प्राप्तवान्। किंभूतं शुक्रं अपापविद्धं पापमहंकारस्तेनास्पृष्टं। अत एव शुद्धं। पुनः अस्नाविरं स्नायवः शिरास्तत्स्वरूपं स्थूलदेहं तस्मादतीतं अस्नाविरं। तथा अव्रणं व्रणं चिन्हं भूतेंद्रियप्राणाव स्थात्मकं लिंगदेहं तस्मादप्यतीतं। एवं चतुर्थे महा[illegible]कारणे देहे वर्तमानमित्यर्थः ॥४४॥ श्लो०॥ यः सत्वाकारवृत्तौ प्रतिफलति युवा देहमात्रावृतोपि तद्धर्मैर्बाल्यवार्धादिभिरनुपहतः प्राण आविर्बभूव॥ श्रेयान्साध्यस्तमेतं स्फ[illegible]निपणमतयः सत्यसंकल्पभाजो ह्यभ्यासाद्देवयंतः परिणतमनसा साकमूर्ध्वं नयंति॥४५॥ टी०॥ अथ जीवन्मुक्तस्य मनः प्राणा ऊर्ध्वं गच्छत इत्येतस्मिन्नर्थे ऋक्शाखीयां श्रुतिं संवादयति। य इति। य आत्मा सत्वाकारवृत्तौ प्रतिफलति स युवा प्राण आविर्बभूव सत्वगुणोपपन्नो जीव इत्यर्थः। स देहमात्रावृतोपि बाल्यवार्धादिभिः तद्धर्मैर्देहधर्मैरनुपहतः सन् श्रेयान् कल्याणरूपस्तथा साध्यः साधयितुमुत्तमां गतिं प्रापयितुं योग्यः। तमेतं प्राणं स्फ[illegible]निपुणमतयः कुशलबुद्धयः सत्ये परब्रह्मणि सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्पो मनोगतिर्येषां ते तथा विधाः पूर्वोक्ताभ्यासाद्देवत्वं प्राप्तुमिच्छंतः परिणतमनसा सह ऊर्ध्वं नयंति। अत्र श्रुतिः तृतीयाष्टके। युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः। तं धीरासः कवय उन्नयंति स्वाध्यो३ मनसा देवयंत इति। बाल्यवार्धकाद्यैर्देहविकारैर्विरहितो युवा मुख्यप्राणः सुष्ठुवासः प्रावरणं यस्य सत्वाक्रांतःकरणप्रतिबिंबितः परिवीतः शरीरावृतः सन्जीवदशां प्राप्तः उ इति निश्चयेन स जायमानः प्रादुर्भूतः सन् श्रेयान् सत्कर्मनिरतो भवति। स्वाध्यः सुखेनाराध्यः तमेवं धीरासः दृढव्रताः कवयः क्रांतदर्शिनो ज्ञानिनः देवयंतः देवत्वं प्राप्तुमिच्छंतः मनसा सह उन्नयंति। सुषुम्णामार्गेण ऊर्ध्वं नयंति ब्रह्मरंध्रं प्रापयंति ॥४५॥ श्लो०॥ प्रायोऽकामोऽस्तकामो निरतिशयसुखायात्मकामस्तदासौ तत्प्राप्तावाप्तकामः स्थितचरमदशस्तस्य देहावसाने॥ प्राणा नैवोत्क्रमंत्युत्क्रमविरतिमिताः स्वस्य हेतौ तदानीं क्वापि जीवो विलीनो लवणमिव जलेऽखंड आत्मैव पश्चात् ॥४६॥ टी०॥ अथ निर्वाणमुक्तिमाह। प्राय इति। प्राङ्निरूपितो जीवन्मुक्तः पुरुषः प्रायो बाहुल्येन अकाम एव तिष्ठति। यतोऽस्तकामः। आत्माकारस्य मनसो विक्षेपाभावात्। परं तु निरतिशयसुख परमानंदः तदर्थमात्मकामः आत्माकारः कामो यस्य तथा। अथ तत्प्राप्तावकामः। परमानंदे क्षुद्रानंदानामंतर्भूतत्वात्। तदुक्तं भगवता। यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः इति। किंभूतः स्थितचरमदशः

ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थितावरमां प्राप्तां दशां यस्य। अथ दशातीतत्वमाह। तस्येति। तस्य पुरुषस्य देहावसाने प्राप्ते सति प्राणा नैवो
त्क्रामंति। उत्क्रमणं हि पुनर्देहारंभाय कल्प्यते। प्रकृते तु तथा न भवति। किंतु स्वस्य हेतौ स्वकारणे [illegible] क्रम
विरतिक्रमेण नाशमिताः प्राप्ताः तदानीं कार्यं जीवद्दशामापन्नः क्वास्ति न क्वापीत्यर्थः। यतो जले लवणमि
व विलीनः लयं प्राप्तः यश्चाखंड आत्मैव तिष्ठति। अवच्छेदकाभावात्। ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः। जीवः
प्रथमं ब्रह्मैवासीत्। मध्ये जीवद्दशां प्राप्तः पुनर्ब्रह्मत्वमेव प्राप्नोतीत्यर्थः। ४६॥ श्लो०॥ पिंडीभूतं यदंत
र्जलनिधि सलिलं याति तत्सैंधवाख्यं भूयः प्रक्षिप्तमस्मिन्विलयमुपगतं नामरूपे जहाति॥ प्रा
ज्ञस्तद्वत्परात्मन्यथ भजति लयं तस्य चेतो हिमांशौ वागग्नौ चक्षुरर्के पयसि पुनरसृक्रेतसी
दिक्षु कर्णौ॥ ४७॥ टी०॥ अथ लवणमिव जले इत्येतद्दृष्टांतं विशदयन्नाह। पिंडीभूतमिति स्पष्टार्थः।
अत्र श्रुतिः। यथा सैंधवखिल्य उदके प्राप्तः उदकमेव अनुविलीयेत नाहास्योद्ग्रहणायेव स्याद्यतो यतस्त्वा
ददीत लवणमेवं वा अर इदं महद्भूतमनंतमपारं विज्ञानघन एव। एतेभ्यो भूतेभ्यः समुत्थाय तान्ये
वानुविनश्यति। न प्रेत्य संज्ञास्तीत्यरे ब्रवीमि इति होवाच याज्ञवल्क्यः। भाष्यं। मैत्रेयीं ज्येष्ठपत्नीं प्रति या
ज्ञवल्क्य उवाच। अरे मैत्रेयि सैंधवखिल्यः सैंधवपिंडः उदके प्राप्तः उदके प्रक्षिप्तः सन् अनुविलीयेत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विलीनः सन् उदकत्वमेव प्राप्नोति। न प्रकारांतरं। ह इति निश्चयेन पु[...] नरस्य सैंधवस्य उद्ग्रहणाय नैव स्यात्।
तत्सैंधवं जले प्रक्षिप्तं तस्य उत् ऊर्ध्वं ग्रहणं बहिर्निःकाशनं तदर्थं नैव स्यात्। पुनस्तस्य न प्राप्तिः।
अथ तदेवाह। तु पुनः लवणं क्षारोदकमेव लभ्यते एवममुना प्रकारेण इदं महद्भूतं अनंतं अक्षोभ्यं अपा
रं अमर्यादं वैराजरूपं विज्ञानघनं परमात्मस्वरूपं एवं एतेभ्यो भूतेभ्यः स्वकारणेभ्यः समुत्थाय उ
दयं प्राप्य तान्येव भूतान्यनुलक्षीकृत्य विनश्यति तस्य न प्रेत्य संज्ञास्तीति प्रेत्य नाशं प्राप्य तस्य संज्ञा
नास्तीति स्वकारणे लीयंत इत्यत्र आर्तभागयाज्ञवल्क्ययोः संवादश्रुतिमुक्तवान्। याज्ञवल्क्य इति हो
वाच। यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चंद्रं दिशः श्रोत्रं पृथिवीं
शरीरं आत्मौषधिर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवती
त्याहरेति सोम्यहस्तं। भाष्यं। जारत्कारव आर्तभागो याज्ञवल्क्यं प्रतिवदति। भो याज्ञवल्क्य अस्य जीव
न्मुक्तस्य पुरुषस्य मृतस्य त्यक्तदेहस्य वागग्निं स्वाधिदैवं अप्येति प्रविशति। मनश्चंद्रं दिशः श्रोत्रं प्रविश
ति। इत्याधिदैवप्रवेश उक्तः। अथ शरीरं पृथिवीं स्वकारणभूतां प्रविशति। आत्मा हृदयावकाशः आका
शे प्रविशति।

॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोमानि कंठादधस्तानि ओषधीः प्रविशंति। केशा मूर्धन्याश्च वनस्पतीन्वृक्षान् प्रविशंति रेतः
शुक्रं लोहितं असृग्‌ चाप्सु प्रविशति। तदा क्वायं पुरुषो भवतीति प्राप्तस्य केलो याज्ञवल्क्यो वदति
आहरेति। भो सौम्य आर्तभाग हस्तं आहरेति हस्तं देहीत्यर्थः ॥४७॥ श्लो०॥ क्षीरांतर्यद्वदाज्यं
मध्यरिमविदितं तत्पृथग्भूतमस्माद्भूतेषु ब्रह्म तद्वद्व्यवहृति विदितं श्रांतविश्रामबीजं त्
॥ यल्लब्ध्वा लाभमन्यत्तृणमिव मनुते यत्र नोदेति भीतिः सांद्रानंदं यदंतः स्फुरति तदमृतं
विद्ध्यतो नान्यदार्तं ॥४८॥ टी०॥ अथ सर्वविश्वमात्मसंबंधेनैव चलतीत्याह। क्षीरांतः दुग्धमध्ये
यदाज्यं घृतमस्तीति मध्यरिमविदितं मध्यरिम्णा माध्यर्येण ज्ञातं आप्य तत् घृतं अस्मात् क्षीरात् पृथ
ग्भूतं भिन्नं मथनात् ज्ञातं यतः पुनर्घृतं क्षीरांतर्निक्षिप्तं सत् दुग्धत्वं न प्राप्नोति तद्वद्भूतेषु ब्रह्मास्तीति
व्यवहृति र्व्यवहारस्तेनाविदितं तद्भूतापेक्षया भिन्नं यतः श्रांतविश्रामबीजं जाग्रत्यां श्रांतस्य
पुरुषस्य सुषुप्तौ यो विश्रामस्तस्य बीजं कारणं। यतः यल्लब्ध्वा प्राणी अन्यलाभं तृणमिव मनुते।
तथा यत्र यस्मिन्ब्रह्मणि भीतिर्नोदेति। यद्वैतवत्। द्वितीयाद्वै भयं भवतीति श्रुतेः। यथा सुषुप्तौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातं

स्थूलसूक्ष्मप्रपंचलये मनः केवलमात्माकारं भवति। एवं सांद्रानंदं वस्तु यदंतः स्फुरति तदमृतं विद्धि जानीहि। अतोऽन्यत्पदार्थजातं बाधितं शुक्तिकारजतवत्। उत्तरक्षणे बाधदर्शनात्। अयमर्थः। केवलमुदकरूपे दुग्धे उदकादिलक्षणं तन्माधुर्यं तदंतर्गतस्याज्यस्यैव संभवति। एवं मृतरूपे देहे चलनादिव्यापारः तथेंद्रियेष्वर्थप्रकाशः। एतदात्मकृतमेव न शरीरकृतं यतो मृतशरीरे तथात्वं न दृश्यते। अनेन तेजोमयोऽमृतमयस्तथांतर्याम्यमृत इत्यादिश्रुतीनां विषयो दर्शितः॥ ४८॥ श्लो०॥ ओतः प्रोतश्च तंतुषु विहवितत पटश्चित्रवर्णेषु चित्रस्तस्मिन् जिज्ञास्यमाने ननु भवति पटः सूत्रमात्रावशेषः॥ तद्वद्विश्वं विचित्रं नगनगरनरग्रामपश्वादिरूपं प्रोतं वैराजरूपे सवितरि तदपि ब्रह्मणि प्रोतमोतं॥ ४९॥ टी०॥ अथेदं विश्वं परंपरया ब्रह्मण्येव ओतप्रोतमिति दर्शयति। इह लोके विततो विस्तृतः पटः तंतुषु ओतप्रोतो दृश्यते। किंभूतेषु तंतुषु विचित्रवर्णेषु। किंभूतः पटः विचित्रवर्णः तस्मिन्पटे जिज्ञास्यमाने सम्यग्विचार्यमाणे। ननु निश्चयेन पटः सूत्रमात्रावशेषो भवति। ऊर्ध्वतंतुषु ओतः तिर्यक्तंतुषु प्रोतः एवंविधो यः पदार्थः स पटसंज्ञो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राप्तः परंतु तत्र सूत्रव्यतिरेकेणान्यः कोऽपि पदार्थो नानुभूयते। तद्वत् गगननगरनरग्रामपश्वादिरूपं
गुणकर्मविभागेन विचित्रं विश्वं वैराजरूपे ब्रह्माण्डविग्रहे प्रोतं स च वैराजो वियति आकाशे प्रोतः
तदपि वियत् ब्रह्मणि प्रोतं अनेनाक्षरं ब्रह्म प्रतिपादितं। अत्र श्रुतिः। स होवाच। यदूर्ध्वं गार्गि
दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं भवच्च भविष्यच्चेत्याचक्षत आकाश एव त
दोतं च प्रोतं चेति कस्मिन्नाकाश ओतश्च प्रोतश्चेति ॥७॥ स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा

अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसंगमस्पर्श
मगंधमरसमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणमनामगोत्रमजरममरमभयममृतमरजम
शब्दमविवृतमसंवृतमपूर्वमनपरमनंतरमबाह्यं न तदश्नोति किंचन न तदश्नोति कश्चन। भाष्यं। जन
कसभायां याज्ञवल्क्येन सह विवदमानेषु ब्राह्मणेषु गर्गकन्या वाचक्नवी तया पृष्टो याज्ञवल्क्यस्तस्याः प्रश्न
मनुवदति स्म स होवाचेति। स याज्ञवल्क्यः ह इति निश्चित्य गार्गीं प्रत्युवाच। भो गार्गि एतद्वै तत्पृष्टं तत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं दिवोयदूर्ध्वं स्वर्गादप्यूर्ध्वं तथापृथिव्याः सकाशात्यदवागधोवर्तते। तथायदंतरायन्मध्येइमे दृश्य
माने द्यावापृथिवी तथा यद्भूतमतिक्रांतं भवद्वर्तमानं भविष्यदागामिपदार्थमित्याचक्षते तत्कस्मिन्नोतं प्रो
तंचेति त्वया पृष्टे सति मयोत्तरितं तदाकाश एव ओतं प्रोतं चेति पुनस्त्वया पृष्टं कस्मिन्वा आकाश ओतश्च
प्रोतश्चेति तत्रोत्तरं श्रूयता मित्याह सहोवाचेति भोगार्गित्वया एतद्वापृष्टं तर्हि ब्राह्मणाः ब्रह्मज्ञाः
पुरुषाः एतदक्षरं अविनाशि ब्रह्मअभिवदंति तस्मिन्नक्षरे ब्रह्मणि आकाश ओतं प्रोतश्चेति शेषः। तत्र श्च
किंभूतमक्षरमिति यदि पृच्छसि तर्हि श्रूयतामित्याह। अस्थूलमिति। स्थूलादिचतुर्विधपरिणामातीतं
त्याज्याभिप्रायेणैकत्वनिर्देशः। अलोहितमिति। लोहितादिवर्णातीतं यथा अस्नेहं स्नेहश्चिक्कणता
गुणस्तद्रहितं। अच्छायममूर्तं अतमं तमोभावरूपाज्ञानाख्यं तत्ततोप्यतीतं। अवायुअनाकाशं ता
भ्यामतीतं असंगं असंमीलितं। अस्पर्शं स्पर्शरहितं। तथा अचक्षुष्कं इत्यादियतः इंद्रियरहितं।
अथतद्रूतं अधिदैवतरूपं। तेजो न भवतीत्यतेजस्कं। तर्हींद्रियचालको प्राणो भविष्यतीतिचेत्तदपि निषेधय
ति। अप्राणमिति। असुखं सुखरहितं नाम गोत्ररहितं अजरं जरातीतं च अमरणस्वभावं द्वितीयाभावात्।

॥२६॥

50

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभयममृतं नित्यं मुक्तस्वभाव अजरं गुणातीतं लोकातीतं वा। अशब्दं शब्दागोचरं अविवृतं विवर्तवर्जितं
असंवृतं अवच्छेदरहितं अपूर्वं न विद्यते किंचित्पूर्वं यस्मात्। अनपरं न विद्यते अपरं यस्मात् अनंतरं नवि-
द्यते अंतरं अभ्यंतरं यस्य अबाह्यं न विद्यते बाह्याचरणं यस्य एवंविधं यत् किंच कमपि न अश्नोति नांगीकु-
रुते असंगोदासीनत्वात्। तथा कश्चन तन्नाश्नोति व्याप्नोति अग्राह्यत्वात्॥४९॥ श्लो०॥ रूपं रूपं प्र-
तीदं प्रतिफलनवशात्प्रातिरूप्यं प्रपेदे ह्येको द्रष्टा द्वितीयो भवति च सलिले सर्वतोनंतरूपः॥ इंद्रो
मायाभिरास्ते श्रुतिरिति वदति व्यापकं ब्रह्म तस्माज्जीवत्वं यात्यकस्मादतिविमलतरे बुध्युपाधौ बिंब

टीका॥ प्रपेदे॥५०॥ अथात्मनो बिंबप्रतिबिंबन्यायेन सर्वात्मकत्वमाह। रूपं रूपमिति। अत्र प्रतिविषये श्रुतित्रयमुप-
न्यस्तवान्। इदं ब्रह्म प्रतिफलनवशाद्रूपं रूपं प्रति प्रातिरूप्यं प्रपेदे। प्रतिरूपभावः प्रातिरूप्यं। अत्र श्रुतिः।
दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतत्पश्यन्नवोचत्। रूपं रूपं प्रतिरूपो बभूवेति। अत्रेयमाख्यायिका। पूर्वम-
श्विनौ देवभिषजावात्मज्ञानोपदेशार्थं दधीचीं प्रतिगत्य आवाभ्यामात्मविद्योपदेष्टव्येत्यूचतुः। तेनोक्तमितं
नि क्षणांतरे उपदेक्ष्यामीति दधीचिवाक्यं श्रुत्वा स्वगृहं गतौ तदनंतरे इंद्रः समागत्य दधीचीं प्रश्नकृतवान् त्वयैतौ म-
दीयभिषजौ नोपदेष्टव्यौ। अथ मदीयवचनं न शृणोषि तर्हि तव शिरः पातयिष्यामीत्युक्त्वा निर्गतः

+६ बिंब+

K K S U LIBRARY RAMTEK 441 106 M-185 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनरश्विभ्यामागतं। ततस्तौ दधीचिमुखाद्विदितवृत्तांतावबोचतुः। भो दधीचे क्षणांतर उपदेश्यामीति तव प्रतिज्ञा मिथ्या भवितुं नार्हतीति। इदानीं तव शिरः स्थानांतरे निधायाश्वशिरस्त्वयि संयोज्यते न शिरसाऽस्मभ्यं उपदिश त्वततः इंद्र आगत्याश्वशिरश्छित्वा गमिष्यति पुनस्तव स्वाभाविकं शिरः संयोजयिष्याव इति ना सत्यवचसा तथाविधायां सत्यां अश्वशिरसा मध्वकांडमुपदिष्टवान् इति पूर्ववृत्तांतः। अथ दध्यङ्ङाथर्वणः। अथर्वणस्यापत्यं आथर्वणः एवंविधो दधीचिः अश्विभ्यां यदवोचत् तदेतद् ऋषिर्वेदः पश्यन् अवोचत्। तत्किं रूपं रूपं प्रतिरूपो बभूवेति प्रतिबिंबितं रूपं यस्येति प्रतिरूप इत्यर्थः। अथ द्वितीयां श्रुतिमाह। एक इति च परं एको द्रष्टा सलिले द्वितीयो भवति पश्यतीति द्रष्टा। अत्र श्रुतिः। सलिले एको द्रष्टाद्वैतो भवतीति। अथ तृतीयां श्रुतिं दर्शयति। इंद्र इति। इंद्रो मायाभिः सर्वतोनंतरूप आस्ते। इंद्रः परमात्मा मायाभिः कृत्वा सर्वतः अनंतरूप आस्ते। अत्र श्रुतिः। इंद्रो मायाभिः पुरुरूप ईयते ज्ञायते इत्यमुना प्रकारेण श्रुतिव्यापिकं ब्रह्मवदति। तस्माद्बुद्ध्युपाधौ प्रतिबिंबितं सत् जीवत्वं याति किंभूते उपाधौ विमलतरे स्वच्छतरे।।५०।। स्तो०।। तत्तौः पश्यंति बुध्या परमबलवतो मायया ऽऽकंपलं गंबुद्धावंतः समुद्रे प्रतिफलितमरीच्यास्पदं वेधसस्तं।। यादृश्या वानुपाधिः प्रतिफलति तथा ब्रह्म तस्मिन्यथा स्वं प्राप्ता दर्शानुरूपं प्रतिफलति तथाऽवस्थितं तत्सदैव।।५१।।

४+ पुरुरूपो बृहद्रूपः ईयते +

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥टी०॥ अथास्मिन्नर्थे ऋक्शाखीयां श्रुतिं संवादयन्नाह। तद्ज्ञा इति। पतनशीलः पतंगः जीवः तं पूर्वं प्रतिपादि-
तं ज्ञानं ति तद्ज्ञाः शास्त्रविदः बुध्या निश्चितांतःकरणवृत्त्या पश्यंति। अथ किंरूपत्वेन पश्यंतीत्याह। बुद्धाविति।
बुद्धौ बुद्धिलक्षणे समुद्रे अंतः वेधसः परमात्मनः प्रतिफलितमरीच्यास्पदं प्रतिफलिताः प्रतिबिंबिताः
ये मरीचयः किरणाः तदेवास्पदं स्वरूपं यस्य स तथा। अथ तस्य पतनशीलत्वं प्रकटयन्नाह। परमेति। प-
रमबलवतो दुर्जयमायस्य वेधसो हिरण्यगर्भस्य मायया अक्तं व्याप्तं मुह्यमानं। अत्र श्रुतिः। पतंगमक्तमसु-
रस्य मायया हृदा पश्यंति मनसा विपश्चितः। समुद्रे अंतः कवयो विचक्षते मरीचीनां पदमिच्छंति वेधसः। भाष्यं।
असुरस्य बलवतो दुरंतमायस्य परमात्मनो मायया अक्तं व्याप्तं अत एव पतंगं पतनशीलं जीवं विपश्चितः ज्ञा-
निनः मनसः संकल्पात्मकस्य हृदा बुद्धिरूपेण बुध्येत्यर्थः। अंतः पश्यं समुद्रनात् व्यापनात् समुद्रः स एव ति
बुद्धिलक्षणः तस्मिन् प्रतिफलितानां वेधसः ईश्वरस्य चित्स्वरूपाणां मरीचीनां पदं स्थानमिति कवयः क्रां-
तदर्शिनः विचक्षते वदंति। परं इच्छंति च उपासते च। अत्र श्लोकार्थेन प्रतिबिंबप्रकारं विशदयन्नाह।
यादृगिति। यद्रूपो यादृक् यत्प्रमाणो यावान् एवंविधो य उपाधिः बुद्धिलक्षणः तस्मिन् तथा ब्रह्म प्रतिफल-
ति। यादृगिति। सत्वरजस्तमोमयः। यावानिति स्थूलसूक्ष्मो दीर्घो वर्तुलो वा यथोपाधिरस्ति तत्र तत्र त-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थैव स्वयं सदैव यथास्थितं सत्तत्प्रतिफलति समयादिं न जहाति। अत्र दृष्टांतमाह। यथेति। यथा आस्यं मुखं
प्राप्तादर्शनु रूपं प्रतिफलति वर्तुलो दीर्घः स्थूलो लघुर्मलिनः शुद्धो वा यथा प्राप्तोय आदर्शो दर्पणः तद
नुरूप इव प्रतिफलति। परंतु स्वयं यथावस्थितमेवास्तीति। तद्वदात्मापि॥५१॥ श्लो०॥ एको भानुस्तद
स्थः प्रतिफलनवशाद्यस्त्वनेकोदकांतर्नानात्वं यात्युपाधिस्थितिगतिसमतां वापि तद्वत्परात्मा॥
भूतेषूच्चावचेषु प्रतिफलित इवाभातितावत्स्वभावावच्छेदोपस्तत्परं तु स्फुटमनुपहतो भासते तैः स्व
भावैः॥५२॥ टी०॥ अथैतदेव दृष्टांतांतरेण द्रढयन्नाह। एक इति। स्पष्टार्थमिदं पद्यं॥५२॥ श्लो०॥ यद्वत्
पीयूषरश्मौ दिनकरकिरणैर्बिंबितैरेति सांद्रं नाशं नैशं तमिस्रं गृहगतमथवा मूर्छितैः कांस्यपात्रे॥
तद्वद्बुद्धौ परात्मद्युतिभिरनुपदं बिंबिताभिः समंताद्भासंते इंद्रियास्यप्रसृतिभिरनिशं रूपमुख्याः
पदार्थाः॥५३॥ टीका॥ ननु जलादिष्वर्कप्रतिबिंबं स्वकीयं रूपमेव प्रकटयति न पदार्थांतरं। एवमात्मप्रति
बिंबो जीवश्चेत्तर्हि कथं पदार्थांतरस्तापको भवतीत्याशंक्य सदृष्टांतमाह। यद्वत्पीयूषरश्मौ जलम
ये चंद्रे दिनकरकिरणैर्बिंबितैः सद्भिः सांद्रं निबिडं नैशं रात्रिभवं तमिस्रमंधकारः नाशं प्राप्नोति। आदि
त्येन चंद्रमा भातीति श्रुतेः। अथवा कांस्यपात्रे दिनकरकिरणैर्मूर्छितैः सद्भिः गृहगतं गृहांतर्वर्तितमिस्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाशमेति इति प्रसिद्धं। तद्बुद्धौ बिंबिताभिः परमात्मद्युतिभिः समंताद्रूपमुख्याः पदार्थाः भासंते।
तर्हि निमीलितनेत्रस्यापि पदार्थभानमस्त्विति तत्राह। किंभूताभिः अनुपदं तत्काल इंद्रियास्य प्रसृताभिः
इंद्रियास्यै रिंद्रियमुख्यैः प्रसृतिभिः प्रसारो यासां ताभिः ॥५३॥ श्लो०॥ पूर्णात्मानात्मभेदात्त्रिविधमिह प त्म
रं बुध्यवच्छिन्नमन्यत्तत्रैवाभासमात्रं गगनमिव जले त्रिःप्रकारं विभाति॥ अंभोवच्छिन्नमस्मिन्प्रति स्यै
फलितमतः पाथसोंतर्बहिश्च पूर्णावच्छिन्नयोगे व्रजति लयमविद्या स्वैः कार्यैः सहैव॥५४॥ टीका॥
अथोपाधावेव त्रेधा ब्रह्म[illegible] प्रतीतिरस्तीत्याह। पूर्णात्मेति। इहोपाधौ पूर्णश्च आत्मा च अनात्मा चेति त्रिविधं ब्रह्म भा
सते। तत्रैकं परं पूर्णं उपाधेर्बाह्याभ्यंतरतो वर्तमानं। तथा द्वितीयं बुध्यवच्छिन्नं बुध्यावृतं। तथान्यत् तृतीयं।
तत्र बुद्धावाभासमात्रं प्रतिबिंबस्वरूपं किमिव जले त्रिः प्रकारं गगनमिव विभाति। अथ प्रकारत्रयमाह। ए
कं अंभोवच्छिन्नं उदकावृतं। अपरमस्मिन्नुदके प्रतिफलितं प्रतिबिंबस्वरूपं [illegible] तृतीयं अतोस्मात्पाथस उ
दकात्तस्मादंतर्बहिश्चेति। एवं पूर्णावच्छिन्नयोगे सति उपाधिभूता अविद्या स्वकार्यैः प्रतिबिंबिताभिः सह
लयं नाशं याति। अधिष्ठानसाक्षात्कारे य आभासः स नश्यतीत्यर्थः ॥५४॥ श्लो०॥ दृश्यंते दारुनार्यो युग
पद्गणिता स्तंभसूत्रप्रयुक्ताः संगीतं दर्शयंत्यो व्यवहृतिमपरां लोकसिद्धां च सर्वां॥ सर्वत्रानुप्रविष्टाद्भि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू॰ नवविभवा यावदर्थानुबंधात्तद्वत्सर्वात्मसूत्रा व्यवहरति जगद्भूर्भुवस्त्वमहांतं ॥५५॥ टी॰ ॥ अथ सूत्ररूपं
सर्वात्मकं प्रत्याह। दृश्यंत इति। युगपदेकसमयावच्छेदेन अगणिताः अनेकाः दारुनार्यः काष्ठरचिता अचेतना
अपि नार्यो नर्तक्यः संगीतं वाद्यनृत्यात्मकं दर्शयंत्यो दृश्यंते। न ह्यचेतनेषु तथात्वं युक्तमित्याशंक्याह। किं
भूता नार्यस्तंभसूत्रप्रयुक्ताः शिल्पिकेन रचितं यत्स्तंभांतःसूत्रं तेन प्रयुक्तास्तालादिनियमेन चेष्टां प्रापिता
न केवलं संगीतं दर्शयंत्यः किंतु लोकसिद्धां सर्वां व्यवहृतिं च लोकप्रसिद्धा सर्वा व्यवहृतिर्व्यवहारः महद्युद्ध
शस्त्रसाधनामृगयादिस्तमपि दर्शयंत्यः तद्वत्सर्वानुप्र[illegible]विष्टात्सूत्रात्मसंज्ञादात्मनः प्रेरकाद्भूर्भुवःस्व
महांतं जगद्व्यवहरति। किंभूतात् अभिनवविभवात् अतर्क्यसामर्थ्यात्। पुनः किंभूतात् यावदर्थानुबं
धात् यावानर्थः प्रयोजनं तावानेव संबंधो यस्मात् यस्मिन् व्यवहारे यावत्प्रयोजनं तावदेवानुबध्नाति नियत
त्वेन संबंधं प्रापयति। न त्वनियतत्वेन। अत्र श्रुतिः। वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः
परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंतीति। अथैतदर्थे ऋक्कुशारवीया श्रुतिश्च। स्त्रियः सतीस्तां उमे
पुंस आहुः पश्यदक्षण्वान्न विचेतदंधः। कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत्। भाष्यं
या इदानीं स्त्रियः सतीः स्त्रीत्वं प्राप्ताः आहुर्लौकिकाः ताः उतामेव मे मम गुह्यं पुंसः पुरुषानाहुः प्रतिपादयंति
तत्त्वज्ञाः कथमन्यस्यान्यभावः उच्यते एकस्यैव निरस्तसमस्तोपाधिकस्यात्मनस्तत्तद्देहोपस्थानमात्रेण तत्तद्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदेशोपपत्तेः श्रूयते। हि त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारीत्यादि स्त्रीत्वं पुंस्त्वं चोभयं वस्तुनो नास्तीत्युक्तं
भवति। श्रुतिस्तदभावं बोधयति। नैव स्त्री न पुमानेष नैव चायं नपुंसकः। यद्यच्छरीरमादत्ते तेन तेन तथोच्यते॥१॥
असमर्थमत्वेतं निगूढं अक्षण्वान् ज्ञानदृष्टिरूपेतः कश्चित्पश्यन्पश्येत् जानाति तथा अंधः अतथारूपः स्थूल
दृष्टिर्न विचेतत्। न विचेतति न जानाति किं पुत्रः वयसाऽल्पो पि यः कविः प्रक्रांतप्रज्ञः ज्ञानी स्यात् सः ईदृं सम
र्थं अविवेके न जानाति। एवमुक्तलक्षणस्य परमात्मनः जानाति स्त्रीत्वपुरुषत्व विजानात् औपाधिकानि जानी
यात् स पितुः स पुत्रः कविः स्वस्योत्पादकस्यापि ज्ञानरहितस्य पिता सत् पितृवत्पूज्यो भवति॥५५॥ श्लो०॥
तत्सत्यं यत्त्रिकालेष्वनुपहतमदः प्राणदिग्व्योममुख्यं यस्मिन्विश्रांतआस्ते तदिह निगदितं
ब्रह्म सत्यस्य सत्यं॥ नास्त्यन्यत्किंचयद्वा परमधिकमतो नाम सत्यस्य सत्यं सत्यस्येति मूर्ता
द्युपहितमवरं सत्यमस्यापि सत्यं॥५६॥ टी०॥ अथ सत्यशब्दव्यपदेशं ब्रह्माह। तदिति। यत्त्रिका
त् लेषु भूतेषु भूतभविष्यवर्तमानेषु अनुपहतं उपहति वर्जितं अबाधितं अदः अमूर्तं प्राणदिग्व्योममुख्यं
प्राणाः मुख्यप्राणादयः दिशो व्योम मुख्यशब्दात् कालादित देव सत्यं। यद्वा प्रकारांतरेणाह। अतोस्माद्ब्रह्म
णः सकाशादन्यत्परमुत्कृष्टं अधिकं महत् किंचिदपि सत्यस्य नाम नास्ति यद्यस्ति तर्हि वेदेषु कथनं प्रसिद्धं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैसत्यवौ

मन्

अतत्व ब्रह्म वै सत्यं त्वौ पदेश्यं। अथ सत्य शब्दं व्युत्पत्याह। स[illegible] त्य च्चेति। सच्चेति मूर्तं पृथिव्य प्तेजो रूपं। त्यच्चे
ति मन्मूर्तं वाय्वाकाशौ ताभ्यामुपहितं आश्रितं यत् अबरं शबलं ब्रह्म तस्यापि सत्यं ब्रह्म ॥५६॥ श्लो०॥ यत्किं
चिद्व्यावहारिकं सत्यं व्यवहृति विषये रौप्य सर्पाम्बु मुख्यं न हि सत्याश्रयेणैव यमिह नियमः सावधि लोकसि
द्धः॥ तद्वत् सत्यस्य सत्ये जगदखिलमिदं ब्रह्मणि प्राविरासीन्मिथ्याभूतं प्रतीतं भवति खलु यतस्तच्च
सत्यं वदंति॥५७॥ टी०॥ अथ सत्यस्य सत्यमिति दृढीकुर्वन् सदृष्टांतमाह। लोके व्यवहार विषये दृश्यजाते य

त्किंचिद्रौप्य सर्पाम्बु मुख्यं असत्यं भाति शुक्तिकायां रजतं रज्ज्वां सर्पः मरीचिषु अम्बु असत्यं भाति तद्व्यतिरेकेण प्र
तिभासासंभवात्। इह लोके अयं नियमः सावधिर्लोकसिद्धो [illegible] सत्याश्रयेणैवासत्यं भातीति नियमो लोकसि
द्धोस्तीति। किंभूतो नियमः सावधिः अवधिना सह वर्तमानः नेदं रजतमित्युत्तर काले बाधदर्शनात्। एवं याव
द्बाधदर्शनं तावदेव रजतादि भासतो अतएवास्यासत्यत्वं। यद्वत् सत्यस्य सत्ये ब्रह्मणीदं जगदखिलं प्राविरासीत्।
प्रादुर्भूतं तदपि सावधित्वात् प्रातिभासिकमित्यर्थः। प्रकारांतरेण सत्यं दृढीकरोति। मिथ्येति। मिथ्याभूतं रज
तादियेन प्रतीतं प्रातिविषयो भवति तत्खल्विति निश्चयेन सत्यं वदंति॥५७॥ श्लो०॥ यत्राकाशावकाशं कल
यति च कलामात्रतां यत्र कालो यत्रावाशा वसानं बृहदिह हि विराट् पूर्वमर्वागिवास्ते॥ सूत्रं यत्राविरासीन्मह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दपि महतस्तद्धि पूर्णात्पूर्णं संपूर्णादर्णवादेरपि भवति तथा पूर्णमेकार्णवांभः ॥५८॥ टी० ॥ अथ पूर्णं ब्रह्म द
र्शयति । यत्रेति । अहो इत्याश्चर्ये । इह दपि स्थूलमपि विराट् पूर्वं ब्रह्म विरा[illegible]डिति पूर्वमुपलक्षणं यस्य । एवंविधरू विधं
पाख्यं अवर्गे वास्ते । तत्किं यत्र यस्मिन्नाकाशावकाशः आकाशस्याप्यवस्थानं । तथा यत्र कालः कलामात्रतां लेशमात्र
तां कलयति प्राप्नोति । तथा यत्राकाशावस्थानं दिक्पर्यवसानं भवति । एवंविधमपि अवर्गे वास्ति । तथात्र सूक्ष्ममवि
रासीत् । किंभूतं महतोपि विराजोपि महद्धिरण्यगर्भाख्यमित्यर्थः । एवंविधं यत्र हीति निश्चयेन तदेव पूर्णं ब्रह्म । अत्र
दृष्टांतमाह । यथेति । यथा स्वरूपेणैव पूर्णादर्णवादेः समुद्रादिपदार्थात् । एकार्णवांभः एकीभूतसप्तसमुद्रादिकं
पूर्णात्पूर्णं तदवशिष्यते पीत्यर्थः । अत्र श्रुतिः । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशि
ष्यते । भाष्ये । एकं साधितपूर्णं तदपेक्षिकं यथा नदी ह्रद तडागः पूर्णस्तडागात्समुद्रः । तथा इदं मूर्तं पूर्णं तदपेक्ष
या अदः अमूर्तं [illegible] पूर्णं तस्मादपि पूर्णमुच्यते । उत्कर्षं प्राप्नोति । तत्पूर्णस्य पूर्णं पूर्णत्वमादाय योगीकृत्य स
न्मीलनेन एकीभावमाप्य पूर्णमेवावशिष्यते । तदेव पूर्णात्पूर्णं अनतिशयं पूर्णमित्यर्थः ॥५८॥ श्लो० ॥ अंतः
सर्वौषधीनां पृथगभिमतरसैर्गंधवीर्यैर्वि[illegible]पाकैरेकं पाथोदपाथः परिणमति यथा तद्वदेवांतरात्मा ॥ नाना
भूतस्वभावैर्वहति च स्वमती येन विश्वं पयोदो वर्षत्यम्भो हुताशः पचति दहति वा येन सर्वांतरोसौ ॥५९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तु

टी०॥ अथ सर्वांतरं ब्रह्माह। अंतरेति। स्पष्टार्थं पद्यं। श्रुतिरपि। यः पृथिव्यां तिष्ठन् पृथिव्या अंतरोयं पृथि
वीं न वेदेत्यादि॥५९॥ श्लो०॥ भूतेष्वात्मानमात्मन्यनुगतमखिलं भूतजातं प्रपश्येत्प्रायः पाथस्तरंगान्व
यवदथ चिरं सर्वमात्मैव पश्येत्॥ एकं ब्रह्माद्वितीयं श्रुतिशिरसि मतं नेह नानास्ति किंचिन्मृत्योराप्नो
ति मृत्युं स इह जगदिदं यस्तु नानेव पश्येत्॥६०॥ टी०॥ अथ ब्रह्मण एकत्वे मूलश्रुतिः सहकारिणीमी
शावास्योपनिषच्छ्रुतिं संवादयन्नाह। भूतेषु बहुषु आत्मानमेकं पश्येत्। तथा एकस्मिन्नात्मन्यखि
लं समग्रं भूतजालं प्रायः बाहुल्येन चिरकालं प्रपश्येत्। किमिव पाथस्तरंगान्वयवत्। पाथश्च तरंगा
थ श्च तेषामन्वयसंबंधस्तद्वत्। अथैकस्मिन्नुदके सहस्रशस्तरंगाः दृश्यंते। तथा सर्वेषु तरंगेषु एकं जलमेव
दृश्यते। नान्यत्किंचित्पदार्थांतरं अनुभूयत इत्यर्थः। एवमेतैः स्थूलप्रकारैरेकमद्वितीयं ब्रह्मैव श्रुतिभिरभि
हितं निरूपितं। परंत्विह किंचिन्नाना न विद्यते। वस्तुतः तस्तु नाना न भवति। परंतु यः नानेव पश्यन् स
मृत्योर्देहाहंकाराभिनिवेशात् पुनर्मृत्युमेवाप्नोति श्रुतिरपि। यस्तु सर्वाणि भूतान्यात्मन्येवानु
पश्यति। सर्वभूतेषु चात्मानं ततो न विचिकित्सति। न विचिकित्सति उत्तमाधमभावेन तारतम्यं न करोति
तथा मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥६१॥ श्लो०॥ प्राक्रूपश्चाद्धस्तिकुंभाद्गगनमिहमितिप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्प

ल्यये सत्यपीदं कुंभोत्पत्तावुदेति प्रलयमुपगते नश्यतीत्यन्यदेशं ॥ नीते कुंभेन साकं व्रजति भजति वा तत्प्रमाणा
नुकारा वित्थं मिथ्या प्रतीतिः स्फुरति तनुभृतां विश्वतस्तद्वदात्मा ॥ ६१ ॥ टी० ॥ अथ प्रोक्तप्रमेयं दृष्टांतेन द
ढीकुर्वन्नाह । प्रागिति । इदं गगनमाकाशं कुंभात्सकाशात्प्राक्पश्चादस्तीति प्रत्यये सत्यपि तनुभृतामित्थमिति
प्रकारैर्मिथ्या प्रतीतिः स्फुरति । अथ तदेवाह । इदं घटावच्छिन्नं गगनं घटोत्पत्तौ सत्यामुदेति उत्पद्यते तथैव घटे प्र
लयं नाशमुपगते घटाकाशो नश्यति । तथा कुंभे अन्यदेशं देशांतरं नीते सति गगनमपि कुंभेन साकं व्रजति तत्प्रमाणा　मा
नुकारो भवति । लघीयसी महति च घटे तत्प्रमाणं भवति तदा दीर्घे निम्ने वक्रे वा घटे तत्तदाकारं भवति तद्वत् विश्व
तश्चराचरात्प्राक् पश्चादात्मा वर्तते इति ज्ञात्वापि पूर्वतत्रावस्थाकल्पनं भ्रांतमेवेत्यर्थः ॥ ६१ ॥ श्लो० ॥ यावान्पिंडो　श्रांतं
न् गुडस्य स्फुरति मधुरिमैवास्ति सर्वोपि तावान्यावान्कर्पूरपिंडः परिणमति सदामोद एवात्र तावान् ॥ वि
श्वं यावद्विभाति द्रुमनगनगरारामचैत्याभिरामं तावच्चैतन्यमेकं प्रविकसति यतो नेतदात्मावशेषं ॥ ६२ ॥
त्म ॥ टी० ॥ अथ प्रकारांतरेण ब्रह्मणः सर्वात्मत्वमाह । यावानिति स्पष्टार्थं ॥ ६२ ॥ श्लो० ॥ बाधायां नादानुभूतिर्यदपि त
दपि सा नूनमाघातगम्या बाध्याघातध्वनीनां न पृथगनुभवः किंतु तत्साहचर्यात् ॥ मायोपादानमेतत्स
हचरितमिव ब्रह्मणा भाति तद्वत्तस्मिन्प्रत्यक्प्रतीते न किमपि विषयीभावमाप्नोतियस्मात् ॥ ६३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना

२ अथ पुनर्नपि ब्रह्मणः सर्वात्म ताम् आह। वाद्यादि इति। यद्यपि वाद्यात्सकाशान्नादानुभूतिर्भवति तदपि तथापि सोऽयं नादानुभूतिः आघातगम्या आघातव्यतिरेकेण नोत्पद्यते। आघात इत्युपलक्षणं। कचिदाघातेन कचिद्वादनेन तयोरास्फुरणेन नादानुभूतिर्भवति। किंतु साहचर्यादेकसमयावच्छेदेन भवतीति प्रत्यक्षसिद्धं। तद्वदेतन्मायोपादानं विश्वं ब्रह्मणा सार्कं सह चरितमेवाभाति। यस्मात्कारणात्तस्मिन्ब्रह्मणि प्रत्यक् विपरीततरीत्या प्रतीते अनुभूते सति किमपि प्रातिभासिकं विषयीभावं न प्राप्नोति। अत्र श्रुतिः। यथा दुंदुभेर्हन्यमानस्य न बाह्यान्शब्दान्शक्नुयात् ग्रहणाय दुंदुभ्याघातस्य च शब्दो गृहीतः॥ भाष्यं। यथा हन्यमानस्य दुंदुभेः बाह्यान्पृथक् स्थितान्शब्दान्ग्रहणाय गृहीतुं न शक्नुयात्। किंतु दुंदुभेर्ग्रहणेन ज्ञानेन सह दुंदुभ्याघातस्य साहचर्येण शब्दो गृहीतः॥ ६३॥

॥ श्लोक ॥ दृष्टः साक्षादिदानीमिह खलु भवता मीश्वरः संविदात्मा विज्ञप्तिस्फारपुरे कोऽगगनवदभिमतः सर्वभूतांतरात्मा॥ दृष्टं ब्रह्मोऽरिक्तं सकलमिदमसद्रूपमाभासमात्रं शुद्धं ब्रह्माहमस्मीत्यविरतमपकनात्रैव तिष्ठेदनीहः॥ ६४॥ टी०॥ अथ निरूपितप्रमेयस्य पर्यवसितमर्थमाह। दृष्ट इति। एतत्पद्यं स्पष्टार्थमिति न व्याख्यातं॥ ६४॥ इति विज्ञानकोशप्रकरणं॥ ॥ लि

॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्लो०॥ इंद्रेंद्राण्योः प्रकामं सुरतसुखजुषोः स्यादनंतः सुषुप्तिस्तस्यामानंदसांद्रं परमिह
गहनं यत्स आनंदकोशः ॥ तस्मिन्नो वेद किंचिन्निरतिशयसुखाभ्यंतरे लीयमानो दुःखी स्या
द्बोधितः सन्निति कुशलमति बोधयेन्नैव सुप्तं ॥६५॥ टी०॥ अथानंदकोशो व्याख्यायते ॥ तत्रानं
दस्वरूपस्य ब्रह्मणोऽभिव्यक्तिः सुषुप्तौ भवति इति सुषुप्तिस्वरूपमाह । इंद्रश्चेंद्राणी च तयोः प्रकामं
स्वेच्छया सुरतसुखमभिलषतोर्यो रतांतः सुरतसमाप्तिः । यथा लोकेषु शुक्रद्रावोपलक्षिते सुरतां
ते सुखाविर्भावो भवति । तथैवेंद्रेंद्राण्योः सुषुप्तौ सुखाविर्भावो भवति । तत्रेंद्रो नाम दक्षिणेक्षणः
पुरुषः तथा वामनेत्रस्थः अर्थप्रकाशकं ज्योतिः सेंद्राणी तयोर्जाग्रत्यां भ्रूमध्ये च स्थानं । स्वापका
ले तु तस्मादवरुह्य हृदयाकाशो पुरीतति स्थाने तिष्ठतः तयोः सुरतप्रसंगः स्वप्नावस्थासुर
तांतः सुषुप्तिः तस्यां यदानंदसांद्रं परं स्थानं स एवानंदकोशः तस्मिन् सुषुप्त्युपलक्षित आ
नंदकोशे जीवः किंचिन्न वेद न जानाति । कुतः इत्याशंक्याह । निरतिशयसुखाभ्यंतरे लीयमानः

न विद्यते अतिशयो यस्मात् तन्निरतिशयं सुखं परमानंदं तत्र लीयमानो लुप्ताहंकारत्वात् । अथ तत
स्य सुखस्य निरतिशयत्वं प्रकटयन्नाह । दुःखी स्यादिति । यतो बोधितः बलात्कारेण जाग्रद्दशां प्रापितः
सन् दुःखी भवति । दुःखं प्राप्नोति । भोजनादिविषयसुखभोगार्थमपि बोधितो दुःखमाप्नोति ।
तस्माद्विषयसुखापेक्षया आत्मसुखमेव निरतिशयमित्यर्थः । यस्मादेवं तस्मात्कारणात् कुश
लमतिर्ज्ञाता पुरुषः सुप्तं सुषुप्त्यवस्थं पुरुषं नैव बोधयेत् । निद्राभंगं न कुर्यात् । श्रुत्युक्तप्रत्य
वायश्रवणात् । एवमिंद्रे प्राणी सुरत विषये जगन्मिथ्यात्वप्रकरणे बह्वः शातपथ्यः श्रुतयः स
भाष्याः सम्यगुदाहृताः संति । अथ स्वप्नसुषुप्तिविषया श्रुतिः । अथ हैतत्पुरुषः स्वपिति नाम गृ
हीत एव प्राणो गृहीता वाक् गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः स यत्रैतत्स्वप्नया चरति ते हास्य लो
काः तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति स यथा महाराजो जानपदान् गृही
त्वा स्वे जनपदे यथाकामं परिवर्तेत एवमेव एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते । भाष्यं ।

॥३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हइतियदाएतदयं पुरुषः स्वपिति निद्रां करोति तदा प्राणः क्षुत्पिपासा प्रवर्तकः गृहीत आकर्षित
एवंभवति वाक्चक्षुश्रोत्रमपिगृहीतं भवति स्वस्वविषयग्रहणाशक्तत्वात् तथा संकल्पविकल्पा
त्मकं मनोपि गृहीतं। अथेत्यनंतरं। एतदयं जीवः स्वप्नया स्वप्नावस्थयाचरति ह इति निश्चयेन
आस्य तेलोकाः क्रीडास्थानानि तदुतेव सत् तत्क्षण एव महाराजो भवति तथा तदुतेव तत्क्षणा
देव महाब्राह्मणः श्रोत्रियो भवति उतेवोच्चावचं अपकृष्टयोनिं निगच्छति। अत्र दृष्टांतमाह। यथा
महाराजः जानपदान्स्वप्रजाः गृहीत्वाऽ आक्रम्य स्वेजनपदे प्राज्य साम्राज्ये यथाकामं यथेच्छं प
रिवर्तते तं व्यापारं करोति। एवमेव एषजीवः प्राणान् गृहीत्वा स्वेशरीरे यथाकामं परिवर्तते।
तथा। अथयदा न कस्यचनवेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततिमभिप्र
तिष्ठंते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाब्राह्मणो वातिघ्नीमानंदस्य
गत्वाशयीतैवमेवैष गच्छते। भाष्यं। अथ स्वप्नावस्थातिक्रमानंतरं यदा सुषुप्तः सुषुप्तावस्था
प्राप्तो भवति। अथ तद्रूपलक्षणमाह। यदेति। यदा न कस्यचन वेद कस्यापि किंचिदपि न जानाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा ह्येताः सुखकारिणो   द्वासप्ततिः सहस्राणि नाड्यः हृदयात्सकाशाद्भित्वा समंततो यत्पु
रीततिमेकांतस्थलं तस्मादभितः प्रतिष्ठंते आवृत्य स्थिताः भवंति। ताभिर्नाडीभिः प्रत्यवसृप्य
आव[र]णं विधाय पुरीतति एकांतस्थले शेते निश्चेष्टतया तिष्ठति। अत्र दृष्टांतमाह। सयथेति।
यथा कुमारो बालः महाब्राह्मणः श्रोत्रियो वा अतिघ्नीं स्थूलसूक्ष्मप्रपंचनाशकर्त्रीं आनंदस्य
पद्वीं गत्वा शयीत। अनेन सर्वेषां जीवानां सुषुप्तिसुखे तारतम्यं नास्तीति सूचितं। तमेवो
क्तप्रकारेण पुरीतति शेते ॥६५॥ श्लो०॥ सर्वे नंदंति जीवा अधिगतयशसा गृण्हता चक्षु
रादीनंतः सर्वोपक[र्]त्री बहिरपि चक्षुषु ह्यो यथा तुल्य संस्पर्शाः ॥ नैतेषां किल्बिष
स्पृक् जठरभृति रूते यो बहिर्वृत्तिरास्ते त्वक् चक्षु श्रोत्र नासा रसन वशमितो या
ति शोकं च मोहं ॥६६॥ टी०॥ अथास्मिन्नर्थे कृकुशोखीयां श्रुतिसंवादयन्नाह। अधिगतेन प्रा
प्तेन यशसा ब्राह्मणाः कृत्वा सर्वे जीवा नंदंति परमसुखं प्राप्नुवंति। आत्मसाक्षात्कारे वर्णाश्र
माद्यः न प्रयोजका भवंति। किंभूतेन ब्र[ह्]मणा चक्षुरादीनंतं गृण्हता आक्रमता। पुनः किंभूतेन

॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहिरपि च सर्वोपकर्त्रीं इंद्रियद्वारा विषयभोगदानेनादृष्टाद्युपकारेण किंभूताः जीवाः तुल्यसंस्पर्शा आत्म
प्राप्तौ तुल्यसंस्पर्शाः संस्पर्शनं येषां ते जातिप्रत्यक्त्वतारतम्यवर्जिता इत्यर्थः। अत्र दृष्टांतमाह। सुषुप्ताविति।
सुषुप्तौ यथा आत्माकारांतःकरणवृत्तौ सत्यां सकलजीवानां तारतम्यं नास्ति तद्वदात्मप्रतीतावपि।
अथैतेषां जीवानां मध्ये यः जठरभृति कुर्वेऽन्नादिविषयभोगार्थं बहिर्वृत्तिरास्ते। किल्बिषस्पृत् कि
ल्बिषं दुःखं स्पृशतीति स तथा।। अथैतदेव प्रकटयन्नाह। त्वगिति। आदित्वक्चक्षुःश्रोत्रनासारसनवशा
मितः इंद्रियाधीनत्वं प्राप्तः सन् शोकं मोहं च याति विषयाप्राप्तौ शोकं प्राप्तौ च मोहमित्यर्थः। श्रुतिः। सर्वे नं
दंति यशसागतेन सभासाहेन सख्या सखायः। किल्बिषस्पृत् पितुषणिर्ह्येषामरं हितो भवति वाजिनाय।
अत्र प्रथममाचार्याभिमतमध्यात्मरीत्या रावणभाष्यं तस्य प्रतिमा अस्ति। तस्य नाम महद्यश इति श्रुतेः।
यशसा परमात्मना आगतेन प्राप्तेन सर्वे जीवा नंदंति। परमानंदं प्राप्नुवंति तथा नृपपशुपतिप्रभृतयः
सर्वे जीवाः सुषुप्तिसमये परमसुखिनो भवंति। तद्वदात्मप्राप्तावित्यर्थः। किंभूतेन यशसा सभा
साहेन सभां स्तेजोरूपानर्थप्रकाशको श्वश्वरादीन्सहते आक्रमते स तथा गृहीतवाक् गृहीतच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्फुरितिश्रुतेः। पुनः किंभूतेन सख्या उपकारकेणापि विषयाभोगनिमित्तत्वेनेत्यर्थः। किंभूता जी
वाः सखायः समानज्ञानाः सदृशसुखानुभवाः। अथैषां जीवानां मध्ये यः पितुषणिः। पितुरित्य
न्ननाम पितुः स्नोतीति स पितुषणिः केवलमुदरंभरः स किल्बिषस्पृक् दुःखभागी भवति। हिय
स्मात्कारणात् अरमत्यर्थं वाजिनाय इंद्रियवीर्याय हितः तत्परो भवति। अथैतदुक्तं भवति। सुख
शब्दव्यपदेश्यं। आत्मसुखमेव इंद्रियं सुखं तु दुःखपक्षांतरभूतमित्यर्थः। अथ दैवरीत्या सायण
भाष्यकारः सर्वे नंदंतीति। सखायः समानाख्यानाः समानज्ञानाः सर्वे मनुष्याः सभ्याः सभा
साहेन सभां सोढुं शक्नुवता सख्या ऋत्विजां प्रतिभूतेन यशं प्रत्यागतेन यशसा यशस्वी सोमेन हे
तुना नंदंति हृष्टा भवंति। स हि स एव सोमः पुण्यानां जनानां किल्बिषस्पृक् यः स्वस्मादन्यः पुरुषः यः श्रे ष
ष्ठतामश्नुते स किल्बिषं भवति बाध्यत्वेन यथा पापं सदाचारैर्बाधितव्यं भवति तद्वत्पापरूपस्य
शत्रोर्बाधकः यद्वा यज्ञे साध्वनुप्रवचनाकरणेन यत्किंचित्किल्बिषमेषां जायते तं यो बाध्यते स
किल्बिषस्पृक् यथा त्वं पितुषणिः पितुरित्यन्ननाम दक्षिणावान मनेन सोमेन स्नोतीति यजमानः किं

॥२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चहितः पात्रेषु निहितः सोमः वाजिनायइंद्रियवीर्याय तत्कर्तुमरं अलं पर्याप्तः समर्थो भव
ति ॥६६॥ श्लो०॥ जागृत्या मंतरात्मा विषयसुखकृते नैकयत्नान्विधास्यन्श्राम्यत्सर्वेंद्रियो
घोधिगतमपिसुखं विस्मरन्याति निद्रां॥ विश्रामाया त्मरूपे त्वतितरसुलभं तेन चातीं
द्रियं हि सौख्यं सर्वोत्तमं स्यात्सरिणति विरसादिंद्रियोत्थात्सुखाच्च॥६७॥ टी०॥ अथ परमा
नंदापेक्षयाक्षुद्रानंदानामतितुच्छत्वमस्तीति अनुभवैकसिद्धत्वेन निरूपयति। जागृत्यां जाग्र
दवस्थायां अंतरात्मा जीवः विषयसुखनिमित्तं अनेकयत्नान्विधास्यन्वर्तते। तत्र विद्यार्न्
देशपर्यटनात् दुःशीलप्रभुसामार्जनात् शूरस्य संग्रामादिप्राणसमर्पणात् चोरस्य देहहिं
कर्म सापर्यवसन्नैकरणात् तथैव गारुडादिविद्योपजीविनः एवं सर्वोपजीविनः स्वस्वोद्यमाति
मे कैण विषयसुखाय यतते तत्रतत्र श्राम्यत्सर्वेंद्रियौघः शिथिलीभूतकरचरणवाग्व्यापारः पुमा
न्विधिवशात् प्राप्तमपि विषयं विस्मरन् विश्रामाय हृद्याकाशावस्थिते स्वात्मरूपेक्षणं निद्रां या
ति अप्राप्ते विषये समुद्विग्नस्य विश्रांत्यै निद्रैवशरणमित्यर्थः। तेन कारणेन इंद्रियोत्थात्सुखा
दतींद्रियं सुखं सर्वोत्तमं सर्वापेक्षया श्रेष्ठतमं तथा अतितरसुलभं वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयसुखापेक्षयाऽल्पप्रयाससाध्यमित्यर्थः। तथा अतिप्रयाससाध्यं किमपि विषयसुखं क्षणभं
गुरं तेच विरसमित्याह। किंभूतादिंद्रियसुखात्परिणतिविरसात्परिणामे दुःखप्रदात्॥६७॥
श्लो०॥ पक्षावभ्यस्य पक्षी जनयति मरुतं तेन यात्युच्चदेशं लब्ध्वा वायुं महांतं श्रममपन
यति स्वीयपक्षौ प्रसार्य॥ दुःखकल्पैर्विकल्पैर्विषयमनुकरर्थीकृतं चित्तमेतत्खिन्नं वि
श्रामहेतोः स्वपिति चिरमहो हस्तपादान्प्रसार्य॥६८॥ टी०॥ अथात्र श्रुत्युक्तदृष्टांतमुपन्य
सन् उक्तार्थमेव दृढीकुर्वन्नाह। पक्षी पक्षावभ्यस्य व्यापारयित्वा मरुतं वायुमुत्पादयति तेन वायु
नोच्चदेशं याति तत्रोच्चैस्तरामाकाशदेशे महांतं वायुं लब्ध्वा पक्षौ प्रसार्य प्राक्तनं श्रममपनयति
क त्यजति। एवं प्रकृते दुःखकल्पैस्तद्विपरीतैर्विकल्पैश्च विषयमनुलक्षीकृत्य एतच्चित्तं करदीकृतं क
ततः खिन्नं सत् हस्तपादान्प्रसार्य विश्रामहेतोश्चिरं स्वपिति। अत्र श्रुतिः। तद्यथास्मिन्नाकाशे
श्येनो वा सुपर्णो वा विपरिपत्य श्रांतः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुषः एतस्मा
अंताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति। भाष्यं। यथायदृ
स्मिन्नदकूप्रसारोपलक्षित आकाशे श्येनः पक्षिकुलहंता पतत्रिविशेषः सुपर्णो गृध्रादिर्वि

॥३६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिपत्य उच्चैरुत्पत्य ततोऽत्रश्रांतः सन् पक्षौ संहत्य प्रसार्य संलयाय विश्रांतये ध्रियते यत्नं करोति। एव
मेवायं पुरुषः एतस्मात् अंताय धावति एतस्मा ज्जाग्रति प्रयासां अंतायो परमाय धावति तूर्णं स्वमूल
माश्रये तत्र सुषुप्तः सन् जाग्रद्दशायां न कंचन कामं विषयोद्देशं करोति। न वा स्वप्नं पश्यति। अथ हस्त
पादान्प्रसार्य त्यत्र तथाबोधितः सन् दुःखी स्यादित्यत्र श्रुतिः। तन्नायतं बोधयेदित्याहुरिति। भाष्यं।
तस्मात्कारणाद्दायतं विस्तारित हस्तपादं प्रसुप्तं न बोधयेत् जागरं न प्रापयेदिति श्रुतय आहुः। तथाचो
क्तमग्निरहस्य दशमकांडे। तस्मादु ह स्वपंतं मधरेव न बोधयेन्नेत देवते देवते मिथुनीभवंत्यौ न
हिनस्यामिति। भाष्यं। तस्मात्कारणादुह नियमेन स्वपंतं पुरुषं मधरेव सहसा न बोधयेत्। यत
एते देवते इंद्रेंद्राण्यो मिथुनीभवंत्यौ स्त रत स्त खा सत्त्वौ न हिनस्यामीति न हन्मीति मत्वा न बोधये
दित्यर्थः। अन्यथा निद्राभंगकर्तुः प्रत्यवायोपि दर्शितः॥ टी० ६॥ श्लो०॥ आश्लिष्यासान्नमात्मा
न किमपि सहसैवांतरं वेद बाह्यं यद्वत्कामी विदेशात्सदनमुपगतो गाढमाश्लिष्य कांतां॥ या
त्यस्तं तत्र लोकव्यवहृतिरखिला पुण्यपापानुबंधः शोको मोहो भयं वा समविषममिदं नस्मर्त्येव र
किंचित्॥ ६२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥टी०॥ सुषुप्तिपरिणामावस्थामाह। आश्लिष्येति। आत्माजीवः आत्मानं परमात्मानं सहसा अकस्मादा
श्लिष्य आलिंग्य एकीभूय किमप्यंतरं सूक्ष्मदेहांतं स्वप्नं बाह्यं स्थूलदेहानुभूतं न वेद न जानाति सर्ववृत्ती
नां लीनत्वात्। अथात्र दृष्टांतरमाह। यद्वदिति। यद्वद् दिदेशात्सदनं स्वगृहमुपगतः कामी चिरकालं प्रोषित
त्वात् कामातुरः कांताकमनीयां स्त्रियं गाढमौत्कंठ्येनाश्लिष्यालिंग्य बाह्यमांतरं बाह्यमपि विषयांतरं
न वेद तद्वदित्यर्थः। अत्र श्रुतिः। यद्वा अस्यैतदात्मकाममाप्तकाममकामं रूपं तद्यथा प्रियया संपरि
ष्वक्तो न बाह्यं किंचन वेद नांतरं। भाष्यं। पूर्वश्रुतौ योस्य परमो लोको भयत्रस्तो न कंचन कामं कामयते
इत्याद्युक्तं। तद्वा एतस्य सुषुप्तावस्थां प्राप्तस्य पुरुषस्य रूपं प्रथमतः आत्मकामं सुखप्राप्तौ अथवा
प्तसकलकामं ततः अकाममस्तमितकामं भवति। एवंशरीरः शरीरावच्छिन्नः परमात्मा प्राज्ञेन जी
वात्मना परिष्वक्तः आश्लिष्टः सन् न वेद किं नांतरं बाह्यं वा। अत्र दृष्टांतमाह। तद्यथेति। प्रियया प्रेमा
स्पदीभूतया स्त्रिया संपरिष्वक्तः पुमानिति स्पष्टं॥६९॥ श्लो०॥ अल्पानल्पप्रपंचप्रलयउपर
तिश्चेंद्रियाणां सुखाप्तिर्जीवन्मुक्तौ सुषुप्तौ त्रितयमपि समं किंतु तत्रास्ति भेदः॥ प्राक्संस्का

म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रात्प्रसुप्तः पुनरपि च परावृत्तिमेति प्रबुद्धो नश्यत्संस्कारजातो न स किल पुनरावर्तते
यश्च मुक्तः ॥७०॥ टी०॥ इदानीं जीवन्मुक्तिसुषुप्त्योर्लक्षणसाम्येऽपि वैलक्षण्यं दर्शयति। जीवन्मुक्तौ सुषु
प्तौ च एतत्त्रितयं समं तुल्यं। किं तत्त्रितयं। अत्यानन्दप्रपंचप्रलयः सूक्ष्मस्थूललक्षणयोः प्रपंचयोः प्र
लयः प्रकृष्टः आत्यंतिको लयः तथेंद्रियाणामुपरतिः उपरमो विलयः गृहीत एव प्राणो गृहीता वागित्या
दि पूर्वमेवोक्तं। तथा सुखाप्तिः निरतिशयसुखप्राप्तिः एवं चेत्तर्हि सुषुप्तिरेव मुक्तिरस्तु नाम कथं पु
नर्मुक्तिसाधनार्थं प्रयास इत्याशंक्याह। किं त्विति। किंतु तत्र सुषुप्तिमुक्त्योर्मध्ये भेदोऽस्ति तमेवाह। प्र
सुप्तः सुषुप्तिं प्राप्तः पुरुषः प्राक्संस्कारात् पुनरपि परावृत्तिमेति। यथा। यश्च प्रबुद्धः प्रबोधं ज्ञानं
प्राप्तः निरंतरं मुक्तः सन् नश्यत्संस्कारजातः सन् पुनर्निवर्तते आवृत्तिं न प्राप्नोति। अयमर्थः। यद्य
पि सुषुप्तौ सर्वप्रलयो भवति तथापि तस्या दैनंदिनत्वादाकस्मिकत्वाच्च प्राक् पूर्वं जागृतौ तदुत्पन्नाः सं
स्कारा बीजरूपेण तिष्ठंति तैरात्मा जीवो ह्याश्लिष्टः पुनरावर्त्यते। मुक्तस्तु शनैर्ज्ञानयोगात्पूर्वसंस्का
रनाशो भवति तेन न स पुनरावर्तते ॥७०॥ श्लो०॥ आनंदान्यश्च सर्वाननुभवति नृपः सर्वसंपत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समृद्धस्तस्यानंदः स एकः स खलु शतगुणः संप्रदिष्टः पितृणां ॥ आदेवब्रह्मलोकं शतशतगुणि-
तास्ते यदंतर्गतास्य ब्रह्मानंदः स एकोस्त्यथ विषयसुखान्यस्य मात्रा भवंति ॥ ७९ ॥ टी० ॥ अथ
सकलविषयसुखापेक्षया सुखस्य निरतिशयत्वं श्रुत्या निरूपयति । आनंदा इति । यः सर्वसंपत्समृद्धो
नृपः सर्वानंदाननुभवति । इतरेषामेकैकविषयप्राप्तौ एक एवानंदो भवति । मनागधिकाना-
मानंदद्वयं । एवमुत्तरोत्तरं यस्य यावतां विषयाणां प्राप्तिस्तावंतस्यानंदा भवंति । एवं सर्ववि- स्त
षयप्राप्तिर्नृपस्यास्त्यतस्तस्य सर्वानंदभोगः । तथा च सर्वविषयानंदा यत्र एकीभवंति
स एको राज्ञ आनंदः स खल्विति निर्धारेण शतगुणः सन् पितृणामानंदः स एवमुत्तरोत्तरं देवलोक-
मारभ्य ब्रह्मलोकपर्यंतं ये शतशतगुणिता आनंदा भवंति ते सर्वेपि यदंतर्गताः अंतर्भूताः स्युः
स एको ब्रह्मानंदोस्ति अथास्य ब्रह्मानंदस्य विषयसुखानि पूर्वोक्तानि क्षुद्रमात्राः अंशा भवंति ।
यथाकाशमेवोपाधिवशेन पृथक्क्षुद्रत्वेन भासते तथैव परमानंदोपि विषयसुखाकारेणेत्यर्थः ।
अत्र श्रुतिः । स यो मनुष्याणां राद्धः समृद्धो भवति । अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः
संपन्नतमः स मनुष्याणां परम आनंदः अथ ये शतं मनुष्याणामानंदाः स एकः पितृणां जितलोका-

॥ ३८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामानंद इत्यादि। तथा अथैष ब्रह्मलोक सम्राडिति हैनमुवाचैषोस्य परमाऽमा यदेषोस्य परमो
लोकः एषोस्य परमानंदः। अथैतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति। भाष्यं। यो
मनुष्याणां मध्ये राद्धसमृद्धः प्राप्तसर्वविषयो भवति। अन्येषां मनुष्याणामधिपतिर्नियंता स
र्वैर्मानुष्यकैर्मनुष्यप्रसिद्धैः कामैः प्रार्थनीयपदार्थैः संपन्नतमस्तस्यानंदः स मनुष्याणां
परमानंदः। अथ ये शतं मनुष्यानंदाः स एकः पितॄणामा
नंदः जितोऽर्जितो लोको यैस्ते जितलोकास्तेषां पितॄणामित्यर्थः। एवमुत्तरोत्तरं कर्मदेवाद्या
नंदाः स्फुटः। अथैष ब्रह्मलोक इति। ह इति निश्चित्य एनं जनकं प्रति याज्ञवल्क्य उवाच। इतीति किं।
भो सम्राट् जनक एष एव उत्कृष्टप्रकार आनंदः ब्रह्मलोकः ब्रह्मैव लोकः प्राप्यवस्थानं यस्मिन्
स ब्रह्मलोकः। अथास्य मुमुक्षोः पुरुषस्य एषा परमोत्कृष्टा निरतिशया संपत् परमैश्वर्यं। तथास्य
एष परमो लोकः पूर्वोक्तः तथा एषोस्य परमानंदः अथैतस्यैवेति। अन्यानि आत्मबहिर्मुखानि
भूतानि जीवजातानि एतस्य निरूपितस्य परमानंदस्य मात्रामेकैकदेशमुपजीवंतीति ये भूतानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्फुरद्ब्रह्मानंदास्ते परमानंदस्यैवांशाः परमानंदे स्फुरद्ब्रह्मानामंतर्भूतत्वात् ॥७१॥ श्लो०॥ यत्रानंदाश्च मोदाः प्रमुद इति मुदश्चासते सर्व एते यत्राप्ताः सर्वकामाः स्फुरत्खिलविरमात्कैवल्ली भाव आस्ते ॥ मां तत्रानंदसांद्रैकधि चिरममृतं सोमपीयूषपूर्णां धारामिंद्राय देहीत्यपि निगमगिरो भ्रूयुगांतर्गलिताय ॥७२॥ टी०॥ अथास्मिन्नर्थे ऋक्शाखीयां श्रुतिं संवादयन्नाह। यत्र यस्मिन्परमानंदे सर्वे आनंदा मनुष्यानंदाः तथा पितॄणां प्रमुदः अजानदेवानां एवमुत्तरोत्तरं सर्वे प्यासते। वर्तंते। यथा यत्र यस्मिन्परमानंदे सर्वे कामाः सत्यलोकादिप्राप्तिरूपा आप्ताः प्राप्ताः स्फुः तथा यत्राखिलविरमात् स्थूलसूक्ष्मप्रपंचविलयात् केवलीभाव आस्ते। तो सोमषोडशकलारूप हिरण्यगर्भ मां जीवदशापन्नं तत्र सांद्रानंदे चिरममृतं कृधिकुरुष्व तथेंद्राय जीवात्मने पीयूषपूर्णां धारां देहि मुक्तानां सोमवदमृतद्रावो भवतीति योगशास्त्रप्रसिद्धं। किं भूतायें द्राय भ्रूयुगांतर्गलितायेति। एवमुक्तप्रमेयं निगमगिरः प्राहुः। अत्र श्रुतिः सप्तमाष्टके। यत्रानंदाश्च मोदाश्च मुदः प्रमुद आसते। कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीं द्रायेंदो परिस्रव। भाष्यं। कामस्य वासनारूपस्य मनसः कामाः यत्राप्ताः प्राप्ता भवंति तत्र माममृतं कृधि तद्देहि। भोक्तृरूपपरमात्मन् इंद्राय सकलेंद्रियनियंत्रे जीवाय अमृतं स्रव। तन्वतींद्रियस्फुरखं हि परमानंदः तथा विषयस्फुरखं इंद्रियजन्ये एवमुभयोर्महति वैषम्येऽनुभवसिद्धे सति कथमुक्तं। एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति इत्याशंक्य श्लोकद्वयेनोत्तरयति ॥७२॥

॥३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्लो०॥ आत्माकूपः सुखात्मा स्फुरति तदपरा त्वन्यथैवा स्फुरंती स्थैर्यं वा चंचलत्वं मन
सि परिणतिं याति तत्रत्यमस्मिन्॥ चांचल्यं दुःखहेतुर्मनस इदमहो यावदिष्टार्थलब्धि
स्तस्यां यावत्स्थिरत्वं मनसि विषयजं स्यात्सुखं तावदेव॥७३॥ टी०॥ आत्मा तावदकूपः
कूपरहितः तथा सुखात्मा सुखस्वरूपोपि विज्ञानमानंदं ब्रह्मेति आत्मनः आनंदरूपत्वं श्रुतिसिद्धं सुषुप्त्यवस्था
यामनुभवसिद्धं चांतः स्फुरतीत्युक्तं। तथा तदपरा तद्विलक्षणा मायान्यथोक्ताद्विपरीतस्वभावा सकूपा दुःख

प

रूपा चात्मसहचरितेव स्फुरति पूर्ववदनुभवसिद्धास्ति एवं तत्रत्यं तयोरात्ममाययोरनुगतं स्थैर्यं चंचलत्वं
वाऽस्मिन्मनसि परिणतिं परिणामं याति। तस्य चिदचिद्रूपिस्वरूपत्वात्।अहो इति संबुद्धौ। यावदिष्टार्थ
लब्धिरभीष्टविषयप्राप्तिस्तावत्प्रयत्नशताकुलस्य मनसः चांचल्यं इदं दुःखहेतुर्भवति। अथ तस्यां विषय
जं सुखं स्यात् प्राप्तौ सत्यां कृतकृत्यत्वेन मनसि यावत् स्थिरत्वं तावदेव विषयजं सुखं स्यात्॥७३॥ श्लो०॥
यद्वत्सौख्यं रतांते निमिषमिह मनस्यैकतानेरसस्यात्स्थैर्यं तावत्सुषुप्तौ सुखमनतिशयं तावदेवा
थमुक्तौ॥ नित्यानंदः प्रशांते हृदि तदिह सुखस्थैर्ययोः साहचर्यं नित्यानंदस्य मात्रा विषयसुखमिदं
युज्यते तेन वक्तुं॥७४॥ टी०॥ अथात्र द्वितीयश्लोके दृष्टांतद्वयमाह। यद्वदिति। यथा इहास्मिन्ननुभवसिद्धिः रतां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेशृंगाररसे मनस्येकताने वा एकाग्रे सति निमिषं निमिषमात्रं सुखं भवति । तथा सुषुप्तौ मनसि यावत्स्थैर्यं तावदेवा
नतिशयं सुखं । अथ मुक्तावपि हृदि प्रशांते सति नित्यानंदो भवति । तस्मात्कारणाद्विह सुखस्थैर्ययोः साहचर्यं सह
द् चरितत्वं अनुभवसिद्धं । तेन कारणेन विषयसुखं नित्यानंदस्य मात्रेति वक्तुं युज्यते ॥७४॥ इत्यानंदकोशप्रकर
णं ॥ श्लो० ॥ श्रांतं स्वांतं स बाह्यव्यवहृतिभिरिदंताः समारुह्य सर्वास्तत्संस्कारयुक्तं ह्युपरमति परावृत्ति
मिच्छन्निदानं ॥ स्वापान्संस्कारजालप्रजनितविषयान्स्वाप्नदेहेनुभूतान्श्रांतः प्रत्यगात्मा प्रवणमि
दमगाच्चूरविश्राममस्मिन् ॥७५॥ टी० ॥ अथ जगन्मिथ्यात्वप्रकरणमुच्यते । तत्र प्रपंचमिथ्यात्वे प्रथमतः स्व
प्नदृष्टांतनिदर्शनेन दर्शयिन् स्वप्नस्वरूपं निरूपयति । इदं स्वांतं मनः बाह्यव्यवहृतिभिः स्त्रीपुत्रादिपोषणप्रभृतिभिः श्रां
तं सत् उपरमति विरमति अव्यापारं भवति । किं कृत्वा ताः सर्वाः बाह्येंद्रियार्थवृत्तीः समारुह्य । यद्वा इदंताः इंद्रियैः
ना कृत्वा इदंताकारेण भासमानविषयांस्तान् अंतः समारुह्य एवं यद्यपि बाह्यव्यवहारास्त्यक्ताः तथापि दृढानुसंधानो
त्पन्न तत्तत्संस्कारयुतं सत् परावृत्तं । अथ किमुद्दिश्य परावृत्तमित्याशंक्याह । निदानमिच्छन् निदानं स्वीयमादिकारणं
आत्मस्वरूपमिच्छन् यथा बहुदेशरणैः खिन्नः पांथः विश्रांत्यै स्वगेहगमनमिच्छति तावदित्यर्थः । अथ श्रुतिः । अथ हैतत्पु
ति रुषः स्वपिं नाम तद्गृहीत एव तत्प्राणो भवति गृहीता वाक् गृहीतं चक्षुः गृहीतं श्रोत्रं गृहीतं मनः इति ततः स्मरणा

॥४०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जं धिरूढसंस्कारजातेनप्रेरितविषयान्स्वाप्नान्सूक्ष्मदेहेऽनुभूतान्प्रोस्य त्यक्त्वा प्रत्यगात्माऽप्रणवपरमात्मसंयो
गोत्सुखं तदस्मिन्नात्मनि विश्रामं विश्रान्तिमगात्। यथा महद्रूपदर्शनाय कश्चित्प्रवृत्तः सामंतो बहिर्द्वारि सेनासन्ना
हं त्यक्त्वा द्वित्रैः पार्षदैः सह प्रविशति। तथा तद्द्वित्राण्यपि त्यक्त्वा केवलं स्वरूपेणैव समक्षं गच्छतीति तद्द्विर्त्यर्थः। अ
नेन तन्न सप्रथमतः सुषुप्तिरेवोद्दिष्टा स्वप्नावस्था तु विधिवशात् दांतराले कैवोत्पन्नेत्युक्तं॥७५॥ श्लो०॥ स्व
प्नः सुखादेर्भवति न तु कुतः साधने मूर्च्छमाने स्वप्ने देहांतरं तद्व्यवहृतिकुशलं न ह्युत्पद्यते चेत्। तत्साम
ग्र्या अभावात्कुत इदमुदितं तत्र हि सांकल्पिकं चेत् किं स्वाप्ने रतान्ते वपुषि निपतिते दृश्यते शुक्रमोक्षः॥७६॥
टी०॥ अथ पूर्वपक्षमुत्थाय दूषयन् श्लोकद्वयमाह। नन्वाशंक्य साधने भोगसाधने स्थूलदेहे तानकर्मेन्द्रियैः सह
मूर्च्छमाने निश्चेष्टतया पतिते सति स्वप्ने स्वप्नावस्थायां सुखादेः सुखदुःखसाधकविषयभोगाः कुतः कस्माद्
वंतीति। अथ चेदेवं ब्रूषे स्वाप्नसंबंधि देहांतरं तद्व्यवहृतिकुशलं स्वाप्नविषयभोगकुशलं नव्यं नवीनं उत्पद्यते।
तेन स्वाप्नव्यवहारस्तत्किं प्राक्तनेन शरीरेणेति। तदपि दूषयति। तत्सामग्र्याः तस्य स्वप्नदेहस्य या सामग्री पि
त्रोः शुक्रशोणितरूपा तस्या अभावात्। कुतः कस्मात् सोमाद्यंतरादिदमुत्पन्नं असद्भूता वेशान्या येनोत्पन्न
मिति चेन्न। स्वाप्ने स्वरतांते स्वाप्नस्त्रीभोगांते शुक्रस्रावः स्वाप्ने शरीरे धारस्तु सपतिते वपुषि निश्चेष्टे स्थूलश
रीरे किमिति दृश्यते। मृषारूपस्य देहस्य स्फुरतांतोपि मृषैवास्तु। स्फुरतांतानित्यं जनकः शुक्रस्रावः सत्यत्वेन कथ
मुपलभ्यत इत्यर्थः॥७६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्लो०॥ भीत्या रोदित्यनेन प्रवदति हसति श्लाघ्यते नूनमस्मात्स्वाप्ने प्यंगे नुबंधं त्यजति न
सहसा मूर्छितेप्यंतरात्मा॥ पूर्वं ये येनुभूतास्तनुयुवतिहयव्याघ्रदेशादयोर्थास्तत्संस्कार
स्वरूपान्सृजति पुनरमून्श्रित्य संस्काररदेहं ॥७७॥ टी०॥ दूषणांतरमाह। भीत्येति। स्वाप्नोत्प
न्नया दरस्कवाघ्रादिभीत्या अनेन स्थूलदेहेन रुदत्येव रोदिति सो दुहासं रोदनं करोति। न स्वाप्नश
रीरेणेत्यर्थः। न केवलं रोदिति अनेनैव प्रवदति यत्किंचिज्जल्पति। तथा सति श्लाघते अहं कृतार्थ इ
ति। एवं पूर्वपक्षमनूद्य प्रागुक्तं पर्यवसितमर्थमाह। नूनमिति। नूनं निश्चयेनास्माद्धेतोः अंतरात्मो
स्वप्नेपि अंगे स्थूलदेहे मूर्छितेपि सहसा अनुबंधं संबंधं न त्यजति। अथासौ अनुबंधः पूर्वं त्वयैव नि
राकृतः कथमिदानीमनुबंधः प्रोच्यते इत्याशंक्याह। पूर्वमिति। पूर्वमनादिजाग्रदवस्थासु ये येऽर्थाः पदा
र्थाः अनुभूताः ते के। तनुयुवतिहयव्याघ्रादयः तनुः शरीरं युवतिः स्त्री स्वकीया परकीया वा हयोश्वः प्रया
णनिमित्तं व्याघ्रो भयनिमित्तं देशः काश्यादिप्रदेशः आदिशब्दादन्येपि विषयास्तेषां पूर्वमनुभूतानां यः
संस्कारः स एव रूपं स्वरूपं येषां ते तथाविधानमूं शरीरादिविषयांस्तदनुरूपानेव पुनः सृजति तदेवं वि
षयाः संस्कारत्वेन भासंत इत्यर्थः। अथांतरात्मा किं सृजतीत्याह। संस्काररदेहं लिंगदेहं श्रित्य तमधिष्ठाय
तस्मिन्देहे सर्वे संस्कारा उद्बुद्धाः संतस्तत्तद्विषयाकारेण परिणमंतीत्यर्थः॥७७॥

न्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्लो०॥ संधौ जाग्रत्सुषुप्त्योरनुभवविदिता स्वाप्नवस्था द्वितीया तत्रात्मज्योतिरास्ते पुरु-
ष इह समाकृष्य सर्वेंद्रियाणि॥ संवेश्य स्थूलदेहं समुचितशयने स्वीयभासा परात्मा पश्यन्संस्का-
ररूपानभिमतविषयान्याति कुत्रापि तद्वत्॥७८॥ टी०॥ अथ श्रुत्यर्थरूपमुक्त्वाऽर्थक्रियां
निरूपयति। जाग्रत्सुषुप्त्योरवस्थयोः संधौ अनुभवसिद्धा स्वाप्नी द्वितीयावस्था तत्र तस्यामवस्था-
यां इह स्वरूपे सर्वेंद्रियाणि समाकृष्य पुरुषो परात्मा आत्मज्योतिरास्ते इंद्रियाभावात्। तस्यामवस्था-
यां यद्विषयग्रहणं तदात्मज्योतिषैव संपादयतीत्यर्थः। ननु तदा स्थूलदेहस्य का गतिरित्यत आह। स्थूलदेहं
समुचितशयने यथाप्राप्तनिद्रास्थले निवेश्य प्रसारितहस्तपादं संवेश्य तथा स्वीयभासा स्वसामर्थ्येन
स्वाप्नदेहान्संस्काररूपान्समुचितेंद्रियगणान् निर्माय यत्र कुत्राप्यभीष्टस्थाने तद्वत्संस्काररूपेणैव यथा-
ति विचरति॥७८॥ श्लो०॥ रक्षन्प्राणैः कुलायं निजशयनगतं श्वासमात्रावशेषैर्मीभूतश्चेतकल्पा-
कृतिकमिति पुनः सारमेयादिभक्ष्यं॥ स्वप्ने स्वीयप्रभावात्सृजति हयरथान्निम्नगापल्व-
लानि क्रीडास्थानान्यनेकान्यपि सुहृदबलामित्रपुत्रानुकारान्॥७९॥ टी०॥ पूर्वश्लोके देहं
विसृज्य यातीत्युक्तं तत्र जीवमजीवं द्वा विसृजति जीवं चेत्तर्हि कथमव्यापारं अजीवं चेत्तर्हि कथं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प
कं

श्वासावकल्पेतं इत्याशंक्य श्लोकद्वयेनोत्तरमाह। निजशयनगतं कुलायं शरीरं प्राणैः कृत्वा रक्षन्नयत्र कुत्रापि पिया
तीति पूर्वेणान्वयः। तर्हि तत्र क्षुत्पिपासादि प्राणकृत्यं कथं न दृश्यते इत्याशंक्याह। किंभूतैः प्राणैः श्वास
मात्रावशेषैः श्वासमात्रं वशिष्टं येषां तेन प्रयोजकव्यतिरेकेण प्राणाः कर्म कुर्वंति। अथ तद्रक्षणहेतुमाह। त
त्पुनः शरीरं प्रेतकल्पाकृति मा भूदिति। अथास्त्वं तथा त्वमिति चेत्तत्र बाधकमाह। सारमेयादिभक्ष्यं मा भू
दिति निर्जीवस्य गृहीणां सारमेयादीनां श्वापदानां भक्ष्यं मा भूदिति। अथ पूर्वश्लोके स्वाप्नदेहान्निर्मयित्वमु
क्तं तदर्थप्रतिपादकं कृत्यं दर्शयति। स्वप्ने स्वीयप्रभावात्स्वसौमध्यात् हयरथान् निम्नगानदीपल्वलानि
ईषत्संचितोदकानि तथानेकानि क्रीडास्थानानि तथा सुहृद्दलं पुत्रमित्रानुकारांश्च सृजति। अनुकारशब्देन प्रा
गुत्कसंस्कारोत्पन्नानीत्यर्थः॥७९॥ श्लो०॥ मातंगव्याघ्रदस्युद्विषदुरगकपीन्कुत्रचित्प्रेयसीभिः
क्रीडन्नास्ते हसन्वा विहरति कुहचिन्निःश्वमश्नाति चान्नं॥ मृत्युत्वं प्राप्तवानस्म्यहमिति कुहचिच्छंकि
तः स्वीयलोकादास्ते व्याघ्रादिभीत्या प्रचलति कुहचिच्छेदिति ग्रस्यमानः॥८०॥ टी०॥ तथा मातंगव्याघ्रद
स्युद्विषदुरगकपींश्च सृजति। तथा कुत्राप्यहं श्रान्तः सन् मृत्युत्वं प्राप्तवानिति स्वीयसुहृल्लोकाच्छंकितआ
स्ते। स्वप्ने शूद्रत्वमापन्न इति वा शिष्टाकैः। तथा कुत्रचित् व्याघ्रादिभीत्या प्रचलति पलायनं करोति पलायन
समर्थोऽपि व्याघ्रादिना ग्रस्यमानः सन् क्रंदते रोदिति। उक्तार्थनिरूपणकाः क्रमेण कृतयः। सयत्रायं प्रस्वपीती

बं

॥४२

82

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यस्य सर्ववितो मात्रामादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा स्वपित्यत्रायं पुरुषः स्वयंज्योति
र्भवति। न तत्र रथा न रथयोगा न पंथानो भवंति। अथ रथान् रथयोगान् पथः सृजते। न तत्रानंदा मुदः प्रमुदो
भवंत्यथानंदान्मुदः प्रमुदः सृजते। न तत्र वेशंताः स्रवंतीपुष्करिणी सृजते स हि कर्ता। तथा प्राणेन रक्षन्न
परं कुलायं बहिः कुलायादमृतश्चरित्वा। तथा। स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि। उतेव स्त्रीभिः
सह मोदमानो जक्षदुतेवापि भयानि पश्यन्नित्यादि। भाष्यं। स जीवः यत्र यदा स्वपिति निद्रां करोति तदा स्य स
र्ववितः सर्वं अवति रक्षतीति सर्ववान् तस्य सर्ववितः परमात्मनो मात्रामेकदेशं आदाय गृहीत्वा स्वयं विहत्य स्वत
वा एव स्फुष्टस्य वस्स्त्रोसक्तो तथा मायिकं वासनामयं स्वप्नदेहं स्वयं निर्माय स्वेन स्वया भासा स्वसामर्थ्या स्वेन ज्योतिषा
स्वप्रकाशेन स्वपिति। यत्रायं पुरुषः स्वयंज्योतिर्भवति। तत्र तस्मिन् स्वप्नसमये न रथाः संति न रथयोगाः अश्वादयः
न पंथानः रथमार्गाः संति। परं तु असौ रथान् रथमार्गान् पथः सृजति। तथा न तत्रानंदाः सुखविशेषाः मुदः क्षु
द्रानंदाः प्रमुदः पुत्रादिलाभहर्षश्चि परं त्वयमानंदादीन् सृजति। तथा नैव वेशंताः पल्वलानि स्रवंत्यो नद्यः त
संति पुष्करिण्यः सरांसि न तडागानि संति। परं त्वेष वेशंतादि सर्वं सृजते। कः सृजते स हि कर्ता अंतरात्मा।
अथ दैनंदिन स्वप्नदशायां प्राणेन पंचवृत्तिना कौलीयते तत् कुलायं शयनभूमौ संनिविष्टं शरीरं रक्षन् सन्
अन्यथा मृतभ्रांतिः स्यात्। स्वयं अमृतः अमरणधर्मा कुलायाद्बहिश्चरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वाशरीरान्तर्गतोपि आकाशवद्बाह्येपि वसन् यत्रकामः यथाकामं भिन्नप्रदेशाय यत्र यत्र कामो विषये भूत्पद्यते तं तं
कायं संस्काररूपेण ईयते गच्छति। अथ स्वप्नान्त इति। ततः स्वप्नान्ते स्वप्नावसरे उच्चावचं देहमीयमानः प्राप्यमान
उच्चं देवादि अवचं तिर्यगादि यथासंस्कारतारतम्यानुरूप्यं देहं गम्यमानः देवः प्रकाशात्मा बहूनि रूपाणि अस
ख्यानि वासनारूपाणि निवर्तयति। तदेवाह। उतेव यथावासनं स्त्रीभिः सह मोदमानः उतेव जक्षद्वहसन्नि
व उतेव भयानि व्याघ्राद्युत्पन्नानि पश्यति॥ टी०॥ श्लो०॥ यो यो दृग्गोचरोऽर्थो भवति स स तदा तद्धितात्म
स्वरूपाविज्ञानोत्पद्यमानः स्फुरति न तु तथा शुक्तिकाज्ञानहेतुः॥ रौप्याभासो मृषैव स्फुरति
चकिरणाज्ञानतो भो भुजंगो रज्ज्वाज्ञानान्निमेषं स्फुरच्च भयकृद्दलोद्दृष्टिसृष्टिं किलेदं॥ ९१॥
टी०॥ अथ जाग्रदवस्थायां दृष्टिसृष्टिपक्षं निरूपयति। जाग्रदवस्थायां योऽर्थः पदार्थः नृपशुपक्षिति
र्यग्रूपो दृग्गोचरो दृष्टिविषयो भवति स स पदार्थः तदा दर्शनसमये तदात्मस्वरूपाविज्ञानोत्पन्न ए
व स्फुरति। तद्धेतुः पूर्वोक्तः पदार्थः तद्धितं यस्मिन्नन्तर्यामित्वेन स्थितं यदात्मरूपं तस्य अविज्ञान
मज्ञानं तस्मादुत्पद्यमान एव स्फुरति। दृग्गोचरीभूतपदार्थो स्वतात्वधिकरणमित्यर्थः। एतदेव दृष्टा
न्तेन द्रढयति। यथा रौप्याभासः शुक्तिकाऽज्ञानहेतुर्दृष्टः शुक्तिकाया अज्ञानमेव हेतुः कारणं यस्य शुक्त्यज्ञा
नेनोत्पादितो रजताभासः इदं रजतमित्याकारकः स्फुरति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वदज्ञानेन पदार्थाकारः स्फुरति। यतः सुषुप्तावात्माकारांतःकरणवृत्तौ सत्यां पदार्थमात्रं न स्फुरति।
चपरं किरणज्ञानतो मरीच्यज्ञानात् मृगजलोत्पत्तिः तथा रज्ज्वज्ञानाद्भुजंगोत्पत्तिः एवं सप्रातिभासिकोपि
पदार्थः निमेषं निमेषसमर्थं यावत्स्फुरणभयकृद्भवति। दरिद्रस्य पिपासार्दितस्य च रौप्यमरीच्यंबुदर्शना
द्राभ्यासनेन स्फुरणं भवति। तथैव भुजंगदर्शनाद्भयं भवति। तथा च प्रातिभासिकस्यापि पदार्थस्य यत्कार्यक्षि
मत्वं दृष्टमस्ति तद्वत्। प्रकृतेपि क्षणिकस्फुरणदुःखोत्पत्तिशक्तत्वमस्तीत्यर्थः। अथेदं पदार्थजातं किलेति
निर्धारेण दृष्टिसृष्टं दर्शनकाले एव सृष्टं। परंतु दृढसंस्कारानुबंधेन ज्ञायते। यतोल्मुके भ्राम्यमाणे परिधिरूपं ते
जो गोचरीभवति नोल्मुकं भवतीत्यर्थः॥२१॥ श्लो०॥ मायाध्यासाश्रयेण प्रविततमखिलं यन्मया तेन म
त्स्थान्येतान्येतेषु नाहं यदपि हि रजतं भाति शुक्तौ न रौप्यं। शुक्त्यंशत्वेन भूतान्यपि मयि तु वसंतीति वि
श्वविनेता प्राहास्माद्दृश्यजातं सकलमपि मृषैवेंद्रजालोपमेयं॥२२॥ टी०॥ अथोक्तार्थं भगवद्वाक्यं
संवादयन्नाह। यद्यस्मात्कारणात् मायारूपो योऽयमध्यास आरोपः तस्याश्रयीभूतेन मयाऽखिलं विश्व
जातं नामरूपात्मकं प्रविततं विस्तारितं तेन कारणेन। एतानि भूतानि मदाश्रयवर्तीनीति प्रतीयते। परं
त्वेतेषु भूतेषु अहं नास्मि असंगोहं न वर्ते न तु कारणं हि स्वकार्यमभिव्याप्य तिष्ठतीति प्रसिद्धिरस्ति।

गू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमुक्तं तेनाहमित्याशंक्य दृष्टान्तेनोत्तरयति । यदपीति । यद्यपि शुक्तौ रजतं भाति परं तु रौप्येषु तस्यं
शो न दृश्यते । अथ यदि दृश्येत भ्रम एव न स्यात् । तेन कारणेन मयि भूतान्यारोपितानि परं तु एतेषु नाहमि
त्यर्थः । इति विष्वग्विनेता जगद्गुरुः श्रीयादवेन्द्रः प्राह । तस्मात्कारणात्सत्फलमपि दृश्यजातं मृषैव । किं भू
तं इन्द्रजालोपमेयं । इन्द्रजालवदुपमीयते तत् । तदुक्तं भगवता । मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्था
नि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ८२ ॥ श्लो० ॥ हेतुः कर्मैव लोके सुखतदितरयोरेवमज्ञो विदित्वा

मित्रं वा शत्रुरित्थं व्यवहरति मृषा याज्ञवल्क्यार्तभागौ ॥ यत्कर्मैवोचतुः प्राग्जनकस्य गृहे चक्रतु
स्तत्प्रशंसां वंशोत्तंसो यदूनामिति वदति न कोऽप्यत्र तिष्ठत्यकर्मा ॥ ८३ ॥ टी० ॥ अथ कर्ममीमांसाप्रकर
णं व्याख्यायते । तत्र सर्वप्राणिनां सदसत्फलहेतुः क[illegible] मैवासीदिति निरूपयति । हेतुरिति । लोके जीवलोके
सुखतदितरयोः सुखदुःखयोर्हेतुः कारणं कर्मैव नान्यत् एवमुक्तप्रमेयमविदित्वा अज्ञो ज्ञानहीनो जंतुर्मि
त्रं शत्रुर्वा इत्थं मृषैव व्यवहरति । मित्रं सुखहेतुः शत्रुर्दुःखहेतुरित्थं अभिनिविष्टः सन्व्यवहरतीत्यर्थः । य
द्स्मात्कारणात् प्राक् पूर्वं याज्ञवल्क्यार्तभागौ जनकगृहे यज्ञमंडपे कर्मैवोचतुः । तथा तत्प्रश्ने कर्म तस्यैव प्र
शंसां चक्रतुः । न केवलं तौ प्रशंसतुर्यदूनां वंशोत्तंसः श्रीकृष्णोऽपीति वदति स्म । इतीति किं । अप्यस्मिन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोके कोप्यकर्मा न तिष्ठतीति। तदुक्तं गीतासु। न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्य
वशः कर्म सर्वः प्रकृतिजैर्गुणैरिति॥ ८३॥ श्लो०॥ वृक्षच्छेदे कुठारः प्रभवति यदपि प्राणिनो यस्त
थापि प्रायोन्नं तृप्तिहेतुस्तदपि निगदितं कारणं भोक्तृयत्नः॥ प्राचीनं कर्म तद्वद्विषमसमफ
लप्राप्तिहेतुस्तथापि स्वातंत्र्यं नश्वरेस्मिन्नहि खलु घटते प्रेरकोस्यांतरात्मा॥ ८४॥ टी०॥
अथ पूर्वग्रंथे यद्यपि कर्मणः प्रशंसा कृता तथापि केवलस्य कर्मणो न फलदानसामर्थ्यं। कुतः अचेतनत्वात्। किं
त्वीश्वरप्रेरितस्य सदृष्टांतमाह। यद्यपि वृक्षच्छेदे कुठारः प्रभवति तथापि स प्राणिनो यस्यास्तीति प्राणी जीव	घः। प्राणो
त्पुरुषेण नोद्यः प्रेर्यमाण एव भवति न स्वातंत्र्येणेत्यर्थः। अथ पुनर्दृष्टांतमाह। प्राय इति। अन्नं प्रायो निश्चये
न तृप्तिहेतुर्भवत्येव तथापि भोक्तृयत्नः पचनभोजनक्रियारूपः कारणं निगदितः। अथ यदर्थं दृष्टांतद्वयमुक्तं
तदाह। प्राचीनमिति। तद्वदुक्तदृष्टांतवत्प्राचीनं कर्म प्राग्जन्मकृतं कर्म यद्यपि विषमसमफलप्राप्तिहेतुर्भ
वति तथाप्यस्मिन्नश्वरे कर्मणि फलदाने स्वातंत्र्यं न हि घटते। किंतु तत्प्रेरकोंतरात्मा भवति। अयमर्थः। क्रि
यमाणं सदसत्कर्म [illegible] तदैव नश्यति। न धर्माधर्मरूपेणात्मनि तिष्ठति तत्तदा
त्मना प्रेरितं सत् भोगानुकूलं भवति। फलभोगस्तु कर्मसाक्षिणा ईश्वरेण प्रेरितस्याविद्यया देहाभिमानिनो
जीवस्यैव संभवति। पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति श्रुतेः। तदुक्तं भगवता। कार्यकारणकर्तृत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेतुः प्रकृतिरुच्यते। पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यत इति ॥८४॥ श्लो०॥ स्मृत्या लोके
षु वर्णाश्रमविहितमदो नित्यकाम्यादिकर्म सर्वं ब्रह्मार्पणं स्यादिति निगमगिरः संगिरंतेति
रम्यं॥ यन्नासानेत्र[illegible] जिह्वाकरचरणशिरश्रोत्रसंतर्पणेन तुष्येदंगेव साक्षात्तरुरिव सकलो
मूलसंतर्पणेन ॥८५॥ टी०॥ क्षुद्रदैवताराधनमपि ब्रह्मार्पणमेव भवतीत्याह। स्मृत्येति। लोकेषु स्मृत्या

द

वर्णाश्रमक्रमेण यन्नित्यकाम्यादिकर्म विहितं तत्सर्वं निषिद्धव्यतिरेकेण पंचविधं ब्रह्मार्पणमेव स्यादिति
निगमगिरः अतिरम्यं युक्तियुक्तं संगिरंते। यद्यपि कर्तारः फलाभिसंधानादन्यदेवतोद्देशेन कर्म कुर्वंति
तथापि ब्रह्मार्पणमेव कर्तारस्तु तत्तद्वासनाभिर्लिप्यंते तत्र षड्विधानि कर्माणि अभिहितानि नित्यान्यकर
णे प्रत्यवायसाधनानि संध्यावंदनादीनि काम्यानि इष्टसाधनानि ज्योतिष्टोमादीनि [illegible] नैमि
त्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि प्रायश्चित्तानि पापक्षयसाधनानि प्रतिषिद्धानि हिंसादी
नि। तत्र नित्यादीनां बुद्धिशुद्धिः परमं प्रयोजनं। उपासनानां तु [चि]त्तैकाग्र्यं विविदिषंति यज्ञेनेत्यादिश्रु
तिः। तपसा कल्मषं हंतीत्यादिस्मृतेश्च। नित्यनैमित्तिकयोरुपासनानां चावांतरफलं पितृलोक[illegible] प्राप्तिः।
कर्मणा पितृलोको विद्यया देवलोक इति श्रुतेः। तथान्यदेवतोद्देशेन कर्म कृतं ब्रह्मार्पणमित्यत्र युक्तिमा
ह। यदिति। नासानेत्रजिह्वाकरचरणशिरःश्रोत्राणां अवयवानां संतर्पणेन सकलो वृक्षः संतर्पितो भवति।

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमन्यदेवतोद्देशेन कृतेपि कर्मणि अन्वयीभूतसकलदेवतात्मकः परमेश्वर एव तुष्यतीत्यर्थः ॥२५॥
॥श्लो०॥ यः प्रेत्यात्मानभिज्ञः श्रुतिविदपि तथा कर्मकृत्कर्मणोस्य नाशः स्यादल्पभोगात्पुनर
वतरणे दुःखभोगो महीयान् ॥ आत्माभिज्ञस्य लिप्सोरपि भवति महान् शाश्वतः सिद्धिभोगो
ह्यात्मा तस्मादुपास्यः खलु तदभिगमे सर्वसौख्यान्यलिप्सोः ॥२६॥ टी०॥ अथेश्वरानभिज्ञेनस्व
त्कर्मकृत्त्वं तच्च स्वरूपमाह। यः श्रुतिविदपि वेदज्ञोपि तथा कर्मकृत्सम्प्रतिपादितकर्मकृत्पुरुषः आत्मा
नभिज्ञः आत्मबहिर्मुखः सन् प्रेति म्रियते अस्य पुरुषस्य कर्मणो नाशः स्यात् कस्मादल्पभोगात्। ते
तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्तीत्यादि भगवद्वचनात्। तथास्य पुरुषस्य पुनर
वतरणे महीयान्दुःखभोगो भवति। तथात्माभिज्ञः सन्यः फलेप्सुर्भवति तस्य का गतिरित्याह। लि
प्सोरप्यात्माभिज्ञस्य महान् शाश्वतः सिद्धिभोगो भवति। महान् स्वर्गलोकादप्यधिकः। तथा शाश्वतः
बहुकालभोग्यः। एवंविधोणिमाद्यष्टसिद्धिभोगो भवति। तथा अलिप्सोः सिद्ध्यनपेक्षस्यात्माभिज्ञस्य
पुरुषस्य तदभिगमे आत्मप्राप्तौ सर्वसौख्यानि भवन्ति। परमानन्दप्राप्तिर्भवतीत्यर्थः। अत्र श्रुतिः।
अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोन्यद्वा कर्म न
नु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

करोति तद्धास्यांततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीय
ते साध्येवात्मनो यद्यत्कामयते तत्तत्सृजत इति। भाष्यं। अथ यः पुरुषः अस्मात्स्वं लोकात्स्वं लोकमा
त्मानं स्वं लोकमात्मानमदृष्ट्वा साक्षादकृत्वा प्रैति म्रियते स एनमात्मानमविदितः अजानन् कर्मफलं
भोक्तुं न समर्थो भवति। भोगावसाने कर्मनाशात्च्यवत इत्यर्थः। अथ कुत आत्मानं न पश्यतीत्याह।
वेदः यथा वेदो वाननुक्तः यथा अननुक्तः अर्थमनुलक्षीकृत्य न पठितः अनुक्तः अननुक्तः वेदतात्पर्यम
जानतः आत्मदर्शनं कृत इत्यर्थः। तथाऽन्यद्वेदार्थाद्विपरीतं यद्यत्कर्म कृतं कमेव निरर्थकमेवेत्य
र्थः। स्वस्वरूपानभिज्ञः पुरुषो यन्महत्पुण्यं अश्वमेधादि कर्म करोति तदं ततः भोगावसानात्क्षीय कं
ते नाशमाप्नोति। अथ चित्तशुद्धिद्वारा आत्मप्रकाशकं यत्कर्म तन्न नश्यतीत्यर्थः। तदुक्तं भगवता। अं
तवत्तु फलं तेषां तद्भवत्यल्पमेधसामिति। तदेवाह। तत्तस्मात्कारणादात्मानमेव लोकमुपासीत स य
आत्मानमेव लोकमुपास्ते ह इति निश्चयेन तस्य कर्म न क्षीयते। ननु विषयसुखलंपटस्य कथमात्मलो
कापेक्षेत्यत आह। अस्मादिति। अस्मादात्मनः सकाशात् यद्यत्कामयते कामना विषयं करोति तत्तत्सृ
जते संपादयति। आत्मयोगादणिमादि सिद्धयो लभ्यन्ते किं पुनरन्यदित्यर्थः॥ १६॥

४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ट

॥श्लो०॥ सूर्याद्यैरर्थभानं न हि भवति पुनः केवलैर्नात्र चित्रं सूर्यात्सूर्यप्रतीतिर्न भवति सह
सा नापि चंद्रस्य चंद्रात्॥ अग्नेरग्नेश्च किंतु स्फुरति रविमुखे चक्षुषि चित्प्रयुक्ता दात्मज्यो
तिस्तनोयं पुरुष इह महो देवतानां च चित्रं॥८७॥ टी०॥ अथ सूर्यचंद्रादीनामर्थप्रकाशकत्वे
न स्वातंत्र्यमस्तीति प्रकटयन्नाह। सूर्याद्यैः सूर्यचंद्रादिभिः केवलैः स्वतंत्रैरर्थभानं पदार्थज्ञानं न
भवतीति प्राक् निरूपितमेवास्तीति नात्र चित्रमपूर्वं। अथान्यदपूर्वमस्तीत्याह। सूर्यादीति। लो
के सूर्याद्याः स्वस्वप्रकाशका इति प्रसिद्धिरस्तीति सा न तात्त्विकी कुतः। यतः सूर्यप्रतीतिः सहसा अकस्मा
न्न भवति। किंतु रविमुखे सूर्यचंद्रप्रभृतिषु चित्प्रयुक्तादात्मैंयुक्तात् चक्षुषो निमित्तभूतात्स्फुरति प्रकाशते। प्र
न निद्राणस्य जात्यंधस्य प्रकाशते। तस्मात्कारणादयं यः कश्चित्पुरुषो जागृत्यां स्वप्ने ज्योतिः प्रकाशकोय
स्य स तथाविधोस्ति। इहेंद्रियव्यापारे चित्रं देवानां चक्षुरादीनां महस्तेजो रूपरसादिप्रकाशकमस्ति
अत्र श्रुतिः। चित्रं देवानामुद्गानीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्राद्यावा पृथिवी अंतरिक्षं सूर्य आ
त्मा जगतस्तस्थुषश्च। भाष्यं। जगतो जंगमस्य तथा तस्थुषः स्थावरस्य चराचरस्य सूर्यः प्रकाशकः
आत्मैव न सूर्यादि यतः स आत्मा मित्रस्य नेत्राधिदेवतत्वेन रूपग्राहकस्यादित्यस्य तथा वरुणस्य रस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्राहकस्य तथाग्नेर्वागधिदेवतस्य चक्षुः प्रकाशकः। न ह्यात्मप्रकाशमंतरेण सूर्यादिप्रतीतिः। [illegible]
अथैतदर्थे प्रत्यायकमनुभवमाह। चित्रमिति। द्योतयंत्यर्थानू प्रकाशयंति ते देवा
श्चक्षुराद्यास्तेषामनीकं प्रकाशसमूहः चित्रं चित्रमुदगादुदयं प्राप्तमनुभूयते। अथैतदुक्तं भवति
रूपरसादिषु पंचविधविषयेषु मध्ये सूर्यादिरेकैकस्य ग्राहकं। न सर्वेषां विचित्राणां तथाविधा
नां ग्राहकत्वं तु तत्तद्वृत्तिप्रवर्तकस्य परमात्मन एव संभवति। नान्यस्य। एवं देहावच्छेदे यदध्या
त्मरूपं एकमनुभूयमानं परमात्मतत्वं तत् द्यावापृथिवी अंतरिक्षं च आ प्रस्वकीयेन तेजसा आ
समंतादापूरयत् सर्वात्मकत्वेन स्थितमित्यर्थः ॥ ८७ ॥ श्लो० ॥ प्राणेनांभांसि भूयः पिबति पु
नरसावन्नमश्नाति तत्र तत्पाकं जाठरोग्निस्तदुपहितबलो द्राक् शनैर्वा करोति ॥ व्यानः स
र्वांगनाडीष्वथ नयति रसं प्राणसंतर्पणार्थं निःसारं पूतिगंधं त्यजति बहिरयं देहतोऽपान
संज्ञः ॥ ८८ ॥ टी० ॥ अथ प्राणादिकृत्यमाह। असौ देही प्राणेन कृत्वा भूयः अंभांसि पिबति पुनरन्नं चा
श्नाति तस्य पीतस्य भक्षितस्य वा तदुपहित [illegible] बलो जाठराग्निः पाकं करोति तेन प्राणेनोपहितबलः
द्राक् शीघ्रं शनैर्वा यथा प्राणः प्रयत्नं करोति। अथ पाकानंतरं परिपक्वान्नोदनस्य रसं
वीज्यमानः सन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारंभागं प्राणसंतर्पणार्थं व्यानः सर्वांग नाडीषु नयति। प्राणशब्देनेंद्रियाणि तेषां संतर्पणार्थं करोति। तथाशेषं
निःसारमन्नमुदकं पूतिगंधं मूत्रविष्ठादिरूपेण त्यजति बहिर्निःसारयति देहतः अपानसंज्ञः। तत्सवितु
मार्तंडस्य प्रकाशकस्य भर्गस्तेजः धीमहि चिंतयामः। किंभूतं। [illegible]। तत्सवितुर्वरेण्यं। सवितुः सूर्यस्य व
रेण्यमुपजीव्यं। अथ तद्देवस्वरूपमाह। धिय इति। यो देवः नोऽस्माकं धियः बुद्धीः प्रचोदयात्प्रेरयति। नि
श्चयात्मकत्वेन रूपं प्रकटयति। अत्रैतदुक्तं भवति। सत्यज्ञानानंदात्मकः सविता सर्वजगदुपादानाश्र
यतया जगत्कर्ता सर्वोपाधिभिश्चिक्रीडिषुः स्वा तदुपाधिधर्मान् विजिगीषुः स्वकमनीयत्वादिमहि
म्नो दर्शयिषुः स्वयं वशीकृतमपि सर्वात्मनाऽऽत्मभूतः सन् अंतर्यामी देवो नोऽस्माकं धियः धीः प्रचो
दयात्। तस्य सवितुर्देवस्यात्मभूतं संसारक्लेशमूलभंजकं भर्गस्तेजः परंज्योतिर्धीमहि। ध्यायेम
हि। किंभूतः रजसः परः अत्र रजस इति चतुर्थ्याः पंचम्यर्थो वगम्यते। असौ अदः व्य[illegible]कार्यं स्वरू
पाद्रजसो लोकात्परः। रजांसि लोका इति यास्कः। ॐमिति अर्वाग्जनित्री प्रणवगम्या॥ ॥छ॥
॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदभगवत्पादपूज्यश्रीमच्छंकराचार्यकृतौ शत
श्लोकीसमाप्ता॥छ॥ ॥श्रीमद्गुरुदेवतागणेशाराधामुकुंदेश्वरार्पणमस्तु॥ श्रीगुरुः प्रसीदतु॥छ॥

KKSU LIBRARY
RAMTEK
441 106
M-1851
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=13.10.20 12:39
,TRANSFERRED=2020/10/13 at 12:51:26
,PAGES=93
,TYPE=STD
,NAME=S0003988
,Book Name=M-1851-SHATSHLOKI STIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection